प्रवेश सं० १५९८५ | विषय: धर्मशास्त्रम् | क्रम सं०

नाम आचारार्कः | ग्रन्थकार दिवाकरः श्रीमहादेवसुनुः

पत्र सं० १-४, ११-१४, १६-७८

श्लोक सं० | अक्षर सं० (पंक्तौ) २५ | पंक्ति सं० (पृष्ठे) १०

आकार: ८.२ x ४.५ | लिपि: दे.ना. | आधार: का.

वि० विवरणम् अपू. 13911 सं. १७४३ | न. का. १५००

पी० एस० यू० पी०—११ एस० सी० ई०—१९५१—५० ०००

Indira Gandhi National Centre for the Arts

॥अथाचारार्कप्रारंभः॥छ॥

Indira Gandhi National
Centre for the Arts

॥श्रीगणेशायनमः॥जानकीनयनयुग्मगोचरंमानिनांनयनयो
॥राम॥ रगोचरं॥नीलमेघरुचिरछविंसदाभावयेमनसिराघवंमुदा॥१॥
॥१॥ उच्चैरपर्णामुखचंद्रबिंबंपरामृशंतंनिजपाणिपल्लवैः॥गंगाध
रंनौमिभुजंगराजप्रक्षेप्सीत्याचकितंमुहुर्मुहुः॥२॥महादेवत
नूजन्माभारद्वाजकुलोद्भवः॥दिवाकरोरविंनत्वाह्याचारार्कंतनो
त्यसौ॥३॥तत्रादावुपोद्घातप्रकरणमारभ्यते॥हारीतः॥ ॥अ
ज्ञानतमसांधानांभ्रामितानांकुदृष्टिभिः॥धर्मशास्त्रप्रदीपोयं ॥राम॥
धार्योमार्गोपदेशकः॥ ॥मनुः॥आचारःपरमोधर्मोनृणांश्रेय ॥१॥
स्करोमहान्॥इहलोकेपराकीर्तिःपरत्रपरमंसुखं॥आचारात्प्रा
प्यतेश्रेष्ठ्यमाचारात्कर्मलभ्यते॥कर्मणाजायतेज्ञानंज्ञाना

न्मोक्षमवाप्यते॥ ॥पराशरः॥आचारःपरमोधर्मआचारःपरमंत
पः॥आचारःपरमंज्ञानंमाचारात्किंनसाध्यते॥यस्त्वाचारविहीनो
पिविद्वान्वेदपरायणः॥सर्वधर्मबहिःकार्योयथाशूद्रस्तथैवसः॥
स्मृत्यंतरेलौकिकाचारोप्याचरणीयकृत्वेनोक्तः॥किंपुनःशास्त्रीयः॥
तथा॥यद्यपिस्यात्स्वयंब्रह्मात्रैलोक्याकर्षणक्षमः॥तथापिलौकि
काचारंमनसापिनलंघयेत्॥ ॥तथा॥समयाचारिकोधर्मोजाति
देशकुलोद्भवः॥ग्रामाचाराःपरिग्राह्याःसर्वत्रैवयथोदितं॥धर्ममू
लमाह।याज्ञवल्क्यः॥श्रुतिःस्मृतिःसदाचारःस्वस्यचप्रियमात्म
नः॥सम्यक्संकल्पजःकामोधर्ममूलमिदंस्मृतं॥पद्मपुराणेपि॥वेदुक्त्वा
दिहशास्त्राणांधर्ममूलंश्रुतिस्मृतीति॥श्रुतिस्मृतिपुराणानांवि



Indira Gandhi National Centre for the Arts

॥राम॥ ॥२॥

रोधो यत्र दृश्यते॥ श्रौतं तत्र प्रमाणं स्याद्द्वयोर्द्वैधे श्रुतिर्वरा॥ श्रुतिद्वैधं
तु यत्र स्यात्तत्र धर्मावुभौ स्मृतौ॥ स्मृतिद्वैधे तु विषयः कल्पनीयः पृथ
क्पृथक्॥ वेदप्रणिहितो धर्मो ह्यधर्मस्तद्विपर्ययः॥ वेदो नारायणः सा
क्षात्स्वयंभूरिति शुश्रुमः॥ यो वैदिकमनादृत्य कर्म स्मार्तेति॥ हासि
कं॥ मोहात्समाचरेद्विप्रो न स पुण्येन लिप्यत इति॥ धर्मलक्षणमाह॥ शं
खः॥ देशे काल उपाये न द्रव्यं श्रद्धासमन्वितं॥ पात्रे प्रदीयते यत्त राम
त्सकलं धर्मलक्षणं॥ हेमाद्रौ विष्णुधर्मोत्तरेपि॥ गंगास्नानं शिवो ॥२॥
देवो विप्रः पूज्यात्मचिंतनं॥ ध्यानं नारायणस्यैतत्संक्षेपाद्धर्मलक्षण
मिति॥ तत्रैव बृहस्पतिः॥ दयाक्षमानसूया च शौचानायासमंगल
लं॥ अकार्पण्यमस्पृहत्वं सर्वसाधारणानि च॥ सर्वेषां विप्रराजन्य

विट्शूद्राणां धर्मलक्षणानीत्यर्थः॥ दयादीनां लक्षणमाह॥ स एव॥
परे वा बंधुवर्गे वा मित्रे द्वेष्टरि वा सदा॥ आपन्ने रक्षितव्यं तु दयैषा
परिकीर्तिता॥ गुणान्न गुणिनो हंति स्तौति मंदगुणानपि॥ नान्यदो
षेषु रमते सानसूया प्रकीर्तिता॥ अभक्ष्यपरिहारश्च संसर्गश्चा
प्यनिंदितैः॥ स्वधर्मे च व्यवस्थानं शौचमेतत्प्रकीर्तितं॥ शरीरं पीड्य ति
ते येन शुभेनापि कर्मणा॥ अत्यंतं तत्र कुर्वीत अनायासः स उच्य
ते॥ प्रशस्ताचरणान्नित्यमप्रशस्तविवर्ज[illegible] एतद्धि मंगलं प्रोक्तम
ृषिभिस्तत्त्वदर्शिभिः॥ स्तोकादपि प्रदात[illegible]सन्नेनांतरात्मना॥ अह
न्यहनि यत्किंचिदकार्पण्यं हि तत्स्मृतं॥ [illegible]त्पन्नेन संतोषः कर्तव्यो
ह्यल्पवस्तुनि॥ परस्य चिंतयन्नर्थं सा[illegible]स्पृहा परिकीर्तिता॥ कर्म
करणे दिङ्नियम उक्तः॥ कर्मप्रदीपे कात्यायनेन॥ यत्र दिङ्नियमो

Indira Gandhi National Centre for the Arts

नास्ति जपहोमादिकर्मसु॥ ति[redacted] स्त्रस्तत्र दिशः प्रोक्ताऐंद्रीसौम्या
पराजिता॥ गौतमः॥ रात्रावुदङ्मुखः कुर्याद्दैवं कार्यं सदैव हि॥ शिवार्चनं
सदाप्येवं शुचिः कुर्यादुदङ्मुखः॥ सदा रात्रौ दिवा चेति व्याख्यातं गुरु
भिः॥ विष्णुः॥ दिङ्मोहे यमाभावे प्राचीमनुरुध्य कर्म कुर्यात्॥ प्राच्यु
क्ता चारमयूखे तंत्रांतरे॥ यत्रैव भानुस्तु वियत्युदेति प्राची तु तां वे
दविदो वदंति॥ ततो परा पूजकपूज्ययोश्च सदागमज्ञाः प्रवदंति तां
तु॥ द्वितीयात्वागमोक्तपूजायामेवेति तत्रैवोक्तं॥ कात्यायनः॥ यत्रो
पदिश्यते कर्म [redacted] कर्तुरंगं न तूच्यते॥ दक्षिणस्तत्र विज्ञेयः कर्मणां
पारकः करः॥ आश्वलायनसूत्रे च॥ दक्षिणः प्रतीयादनादेशादि ॥राम॥
ति॥ वाराहपुराणे॥ स्नानपूजातर्पणादिजपहोमामरार्चनं॥ उप ॥३॥
वासव्रता कार्यं सायं संध्याहुतीर्विना॥ चतुर्विंशतिमते॥ रक्षनपः

फलं मूलं पयस्तांबूलमौषधं॥ भक्षयित्वापि कर्तव्याः स्नानदाना
दिकाः क्रियाः॥ कर्मप्रदीपेपि॥ मंत्रानुद्रवणे आलालंभे अवेक्षणे॥
अधोवायुसमुत्सर्गे प्रहासेनृतभाषणे॥ मार्जारमूषकस्पर्शे आ
क्रुष्टे क्रोधसंभवे॥ निमित्तेष्वत्र सर्वत्र कर्म कुर्वन्न[redacted]पः स्पृशेत्॥
हारीतः॥ आर्द्रवासा जले कुर्यात्तर्पणाचमनं जपं॥ शुष्कवासाः स्थ
ले कुर्यात्तर्पणाचमनं जपं॥ आपस्तंबः॥ संध्यार्थे भोजनार्थे वा स्ना
नार्थे पितृकर्मणि॥ शूद्राहृतेन नाचामेद्यागादिहवनेषु च॥ यमः॥
आपः करनखस्पृष्टाः समाचमति यो द्विजः॥ सुरां पिबति सुव्यक्तं य
मस्य वचनं यथा॥ बौधायनः॥ शुद्धाभावे भवेल्लिंगं विद्रुमोत्थं कांतुत
जलं॥ योगयाज्ञवल्क्यः॥ आर्षं छंदश्च दैवत्यं विनियोगं तथैव च॥
वेदितव्यं प्रयत्नेन ब्राह्मणेन विशेषतः॥ छंदोगपरिशिष्टे॥ आसीन

Indira Gandhi National
Centre for the Arts

आचारार्क

॥राम॥
॥५॥

ऊर्ध्वः प्रह्वो वा नियमो यत्र नेदृशः॥ तदासीनेन कर्तव्यं न प्रह्वेन न तिष्ठता॥ स
दोपवीतिना भाव्यं सदा बद्धशिखेन च॥ विशिखो व्युपवीतश्च यत्करोति न तत्
कृतं॥ न वा त्र्युत्तरार्धे न यज्ञोपवीतस्य कर्मांगतोक्ता॥ कर्मकालातिरिक्तका
ले यज्ञोपवीतधारणमैच्छिकमिति वाच्यं॥ मलापकर्षणस्नाने गात्राभ्यंगे
तथैव च॥ उपवीतं पृथक्कुर्यादन्यत्र नरकं व्रजेत्॥ इत्याश्वलायनोक्तेः॥
मंत्रान्यस्तोपवीतं यद्विनाभ्यंगं न चोद्धरेत्॥ त्रुटितं वा यदि भ्रष्टं पुनर्मं
त्रेण धारयेत्॥ नवीनं धारयेद्विप्रो न जीर्णं न परैर्धृतमिति हारितोक्ते राम ॥५॥
श्च॥ अथात्र प्रसंगाद्यज्ञोपवीतनिष्पत्तिप्रकारं तद्धारणप्रकारं च व
दामः॥ प्रयोगपारिजाते विष्णुः॥ कार्पासक्षौमगोवालशाणवल्कतृणा
दिकं॥ यथासंभवतो धार्यमुपवीतं द्विजातिभिः॥ शुचौ देशे शुचिः सू
त्रं संहतांगुलिमूलके॥ आवेष्ट्य षण्णवत्या तत्त्रिगुणीकृत्य यत्नतः॥

श्येतु शूद्रे कृष्णां तु निर्दिशेत्॥ ॥भृगुः॥ यस्मिन्देशे तु यत्तोयं या
च यत्रैव मृत्तिका॥ सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते॥ द्वि
लिंगे मृत्तिके देये गुदे पंच करे दश॥ उभयोः सप्त दातव्या विट्शौचे
तु मृत्तिकाः स्मृताः॥ शौनकः॥ आर्द्रामलकमात्रा तु मूत्रशौचे तु मृ
त्तिका॥ दक्षः॥ तिस्रोपाने दशैकस्मिन् उभयोः सप्त मृत्तिकाः॥ वि
ष्णुः॥ अर्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता॥ द्वितीया च तृतीया
च तदर्धा द्विप्रकीर्तिता॥ ॥वसिष्ठः॥ एका लिंगे करे तिस्र उभयो
र्मृत्तिका द्वयं॥ एकैकया मृदा पादौ प्रक्षाल्य तु शुचिर्भवेत्॥ मूत्रशौ
चं समाख्यातं शुक्रे तु द्विगुणं भवेत्॥ शंखः॥ तिस्रस्तु पादयोर्दे
या शौचकामस्य नित्यशः इति॥ एतच्छौचं गृहस्थानां द्विगुणं ब्र
ह्मचारिणां॥ त्रिगुणं स्याद्वनस्थानां यतीनां स्याच्चतुर्गुणं॥ पाद

Indira Gandhi National Centre for the Arts

आचारार्क०

॥राम॥ ॥११॥

शौचे क्रमः स्मृत्यंतरे॥ शौचाद्दते वामपादे पूर्वं न क्षालनं भवेत्॥ शौ
चे तु वामं पूर्वं स्यादन्यत्र दक्षिणं सदा॥ रात्र्यादौ विशेषः स्मृत्यर्थ
सारे॥ दिवा यद्विहितं शौचं तदर्धं निशि कीर्तितं॥ तदर्धमातुरे प्रो
क्तं मातुरस्यार्धमध्वनि॥ स्त्रीशूद्रादेरशक्तानां बालानां चोप
नीतितः॥ गंधलेपक्षयकरं शौचं कुर्यान्नसंख्यया॥ ॥आश्व
लायनः॥ लिंगशौचं पुरा कृत्वा गुदशौचं ततः परं॥ देवलः॥
द धर्मविद्दक्षिणं हस्तमधःशौचे ~~क्तःस्पर्श~~॥ न योजयेत्॥ तथा च
वामहस्तेन नाभेरूर्ध्वं न शोधयेत्॥ ऋष्यशृंगः॥ धाराशौ ॥राम॥
चं न कर्तव्यं शौचशुद्धिमभीप्सुना॥ चुलके नैव कर्तव्यं हस्तशु ॥११॥
द्धिविधानतः॥ ॥मनुः॥ यावन्नोपैत्यमेध्याक्तो गंधो लेपश्च
यत्कृतः॥ तावन्मृद्वारि चादेयं सर्वासु द्रव्यशुद्धिषु॥ अंगिराः॥

संध्ययोरुभयोर्जप्ये भोजने दंतधावने॥ पितृकार्ये च दैवे च
तथा मूत्रपुरीषयोः॥ गुरूणां संनिधौ दाने यागे चैव विशेष
तः॥ एषु मौनं समातिष्ठन्स्वर्गं प्राप्नोति मानवः॥ आपस्तंबः॥ न
च सोपानत्को मूत्रपुरीषे कुर्यादिति॥ सायणीये॥ गृहीत्वा जल
पात्रं तु विण्मूत्रे कुरुते यदि॥ तज्जलं मूत्रसदृशं पीत्वा चांद्राय
णं चरेत्॥ मलमूत्रं त्यजेद्विप्रो विस्मृत्यैवोपवीतधृक्॥ उपवी
तं तदुत्सृज्य गृह्णादन्यं नवं तदेति॥ अंगिराः॥ मूत्रोत्सर्गे द्विजः कृ
त्वा न कुर्याच्छौचमात्मनः॥ मोहाद्भुक्त्वा त्रिरात्रेण जलं पीत्वा विशु
ध्यति॥ उक्तशौचाकरणे प्रायश्चित्तं स्मृतिरत्नावल्यां॥ गाय
त्र्यष्टशतं चैव प्राणायामत्रयं तथा॥ बौधायनः॥ देशं कालं
तथात्मानं द्रव्यं द्रव्यप्रयोजनं॥ उपपत्तिमवस्थां च ज्ञात्वा शौ

Indira Gandhi National
Centre for the Arts

चंप्रकल्पयेत्॥ व्यासः॥ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा॥ यः
स्मरेत्पुंडरीकाक्षं स बाह्याभ्यंतरः शुचिः॥ आश्वलायनः॥ कुर्याद्द्वादश
गंडूषान्पुरीषोत्सर्जने ततः॥ मूत्रोत्सर्गे तु चतुरो भोजनांते तु षोडश॥ भ
क्ष्यभोज्यावसाने तु गंडूषाष्टकमाचरेत्॥ गंडूषदेशः प्रयोगपारिजा
ते॥ पुरतः सर्वदेवाश्च दक्षिणे पितरस्तथा॥ ऋषयः पृष्ठतः सर्वे वामे
गंडूषमाचरेत्॥ अथ प्रयोगः॥ पूर्वोक्तब्राह्ममुहूर्ते उत्थायाचम्येष्ट
देवतां नमस्कृत्य प्रातःस्मरणं विधाय रविं गुरुं च नमस्कृत्य ग्रामाद्ब
हिर्नैर्ऋत्यामिषुक्षेपमेत्य शुद्धमृत्तिकां ससिकतां जलपात्रं चादाय
कीटादिरहितस्थले गत्वा मज्जलपात्रे निधायायज्ञियैरनार्द्रैस्तृणै
र्भूमिमाच्छाद्य प्रावृतशिराः पृष्ठतः कंठलंबितयज्ञोपवीतो यद्येक
वस्त्रश्चेद्दक्षिणामुखो मूत्रपुरीषमुत्सृज्य लोष्टादिना गुदं परिमृ



ज्य गृहीतशिश्न उत्थाय पूर्वगृहीतमज्जलपात्रेण गृहीत्वार्द्रामलकमा
त्रमृज्जलैर्द्विवारं लिंगशौचं कृत्वा ईषत्प्रसृतितदर्धार्धमृज्जलैस्त्रिवा
रमपानं संशोध्य पुनर्जलैरेव लिंगगुदे प्रक्षाल्य शुद्धमृत्तिकयैकवा
रं हस्तं प्रक्षाल्य शुद्धभूमावागत्यान्यमृज्जलैर्दशवारं वामकरं प्रक्षा
ल्य ततः करद्वयं सप्तवारं तावद्भिरेव मृज्जलैः प्रक्षाल्य वामदक्षिणपा
दौ प्रत्येकं त्रिः प्रक्षाल्यान्यजलेन द्वादशगंडूषान्वामभागे कृत्वा ज
लपात्रं त्रिः पर्युक्ष्य जलबिंदून् जले निक्षिप्योपवीती द्विराचामेत्॥ मूत्र
मात्रोत्सर्गे तु पूर्ववदेकवारं लिंगं प्रक्षाल्य वामकरं त्रिः प्रक्षाल्य करद्व
यं द्विः प्रक्षाल्यैकैकयामृदा पादौ प्रक्षाल्य गंडूषचतुष्टयं विधाया
चामेत्॥ ॥इति शौचप्रकरणं॥ ॥अथाचमनं॥ वृद्धपराशरः॥ कृ
त्वाथ शौचं प्रक्षाल्य हस्तौ पादौ च मृज्जलैः॥ निबद्धशिखकच्छस्तु

Indira Gandhi National
Centre for the Arts

द्विज आचमनं चरेत्॥ आचमननिमित्तान्याह हेमाद्रौ मनुः॥ प्राणस्या
यमनं कृत्वा आचमेत्प्रयतोपि सन्॥ अंतरं विघ्नतेयस्मात् तस्मादा
चमनं स्मृतं॥ कृत्वा मूत्रं पुरीषं वा खान्याचांत उपस्पृशेत्॥ वेदम
ध्येष्यमाणश्चाप्यन्नमश्नंश्च सर्वदा॥ खानीं द्रियच्छिद्राणि॥ चांडाल
म्लेच्छसंभाषे स्त्रीशूद्रोच्छिष्टभाषणे॥ उच्छिष्टपुरुषं स्पृष्ट्वा भोज्यं
चापि तथाविधं॥ आचमेदश्रुपाते च लोहितस्य तथैव च॥ यमः॥ उ
तीर्योदकमाचम्य अवतीर्य तथैव च॥ मार्कंडेयपुराणे॥ देवार्चनादि ॥राम॥
कार्याणि तथा गुर्वभिवादनं॥ कुर्वीत सम्यगाचम्य तद्वदेव भुजिक्रियां॥ ॥१३॥
वसिष्ठः॥ क्षुते निष्ठीवते सुप्ते परिधानेश्रुपातने॥ पंचष्वेतेषु वाचामेच्छ्रो
त्रं वा दक्षिणं स्पृशेदित्याचमननिमित्तानि॥ ॥अथ द्विराचमननिमि
त्तान्याह हेमाद्रौ व्यासः॥ दंभे भोजनकाले च संध्ययोरुभयोरपि॥

आचांतः पुनराचामेत् जपहोमार्चनेषु च॥ याज्ञवल्क्यः॥ स्नात्वा
पीत्वा क्षुते सुप्ते भुक्ते रथ्योपसर्पणे॥ आचांतः पुनराचामेद्वासो वि
परिधाय्य च॥ कौर्मे॥ ओष्ठौ विलोमकौ स्पृष्ट्वा वासो विपरिधाय
च॥ रेतोमूत्रपुरीषाणामुत्सर्गेशुद्धभाषणे॥ ष्ठीवित्वाध्ययनारंभे का
सश्वासागमे तथा॥ चत्वरं वा श्मशानं वा समागम्य द्विजोत्तमः॥ संध्ययो
रुभयोस्तद्वदाचांतोप्याचमेत्पुनः॥ बौधायनः॥ भोजने हवने दाने उ
पहारे प्रतिग्रहे॥ हविर्भक्षणकाले च द्विराचामेत्तु सर्वथा॥ हविर्भक्षणो
त्तरमाचमनं न कार्यमित्यपि पक्षांतरं अपरार्के स्मृत्यंतरे॥ द्राक्षादी
निफलानीक्षून् पयोमूलं घृतं दधि॥ तांबूलमौषधं पत्रं हविर्भुक्त्वापि
नाचमेदिति॥ आचमनविधिमाह योगी॥ ॥अंतर्जानुः शुचौ देशे
उपविष्ट उदङ्मुखः॥ प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत्॥

Indira Gandhi National
Centre for the Arts

॥राम॥
॥२०॥

त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत्॥ इदं च द्विजातिविषयं।
हृत्कंठतालुगाभिस्तु यथासंख्यं द्विजातयः॥ शुध्येरन्स्त्री च शूद्रश्च स
कृत्स्पृष्टाभिरंततः इति॥ याज्ञवल्क्ये न स्त्रीशूद्रयोः सकृद्विधानात्॥ उद
ङ्मुखत्वादिनियमोपि द्विजग्रहणात्तद्विषय एव॥ जलग्रहणं गोकर्णाकृ
तिकरेण कार्यमित्याह कण्वः॥ आयतं पूर्वतः कृत्वा गोकर्णाकृतिवत्करं॥
संहतांगुलिना तोयं गृहीत्वा पाणिना द्विजः॥ मुक्तांगुष्ठकनिष्ठेन शेषे
णाचमनं चरेत्॥ अन्वारंभमाह यमः॥ तावन्नोपस्पृशेद्विद्वान्यावद्
वामेन न स्पृशेत्॥ तीर्थमाह योगी॥ कनिष्ठादेशिन्यंगुष्ठमूलान्यग्रं
करस्य च॥ प्रजापतिः पितृब्रह्मदेवतीर्थान्यनुक्रमात्॥ करतले त्वग्नि राम ॥१८॥
तीर्थं न प्रतिग्रहः स्मृत इति॥ आचमनार्थं तोयमाह शंखः॥ ॥ अद्भिः स
मुद्धृताभिस्तु हीनाभिः फेनबुद्बुदैः॥ वह्निना न च तप्ताभिरक्षाराभि

अत्रिः॥ मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः॥ तदार्द्रकाष्ठं शुष्कं वा
भक्षयेद्दंतधावनं॥ कात्यायनोपि॥ उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा स
माहितः॥ परिजप्य च मंत्रेण भक्षयेद्दंतधावनमिति॥ शुचिर्भूत्वा विण्मू
त्रोत्सर्गेण शुचिर्भूत्वेत्यर्थः॥ जपमंत्रः प्रयोगे वक्ष्यते। दक्षः॥ कनिष्ठा
ग्रसमस्थूलं पर्वार्धकृतकूर्चकं॥ दंतधावनमुद्दिष्टं जिह्वोल्लेखनिका
तथा॥ दंतान्प्रक्षाल्य स्नायादिति। छंदोगपरिशिष्टात् स्नानांगमिति के
चित्॥ तन्न॥ मध्याह्ने स्नानादावपि दंतधावनप्रसंगात्॥ न चेष्टापत्ति
रिति वाच्यं॥ अस्मादेव वचनैर्मुखे पर्युषिते सत्येव तद्विधानात्। तर्हि
मध्याह्नकालेषु मुखस्य पर्युषितत्वं संभवति॥ तस्मात्पृथगेव तदिति
सिद्धं॥ अत एव श्रीमातामहचरणा दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन
यजेतेतिवत्कालार्थः संयोग इति युक्तमुत्पश्यंति। दंतधावने दिङ्

नियममाह गर्गः॥ प्राङ्मुखः प्राप्नुते सौख्यं शरीरारोग्यमेव च॥ दक्षिणे
॥राम॥ न तथा कष्टं पश्चिमेन पराजयः॥ उत्तरेण गवां नाशः स्त्रीणां परिजनस्य
॥१६॥ चेति॥ ॥अत्र कालादि निषेधमाह व्यासः॥ ॥प्रतिपद्दर्शषष्ठीषु नवम्यां
चैव भारत॥ दंतानां काष्ठसंयोगाद् हत्यासप्तमं कुलं॥ श्राद्धे च यज्ञे
नियमेना द्यात्प्रोषितभर्तृका॥ दंतकाष्ठमिति शेषः॥ आचार्यः॥ अष्ट
म्याश्च चतुर्दश्योः पंचदश्यां त्रिजन्मसु॥ व्यतीपाते च संक्रांत्यां दंत
काष्ठं न भक्षयेत॥ वसिष्ठः॥ शन्यर्कशुक्रवारे तु कुजाहे व्रतवासरे॥ राम
जन्माहे श्राद्धदिवसे दंतकाष्ठं विवर्जयेत्॥ यमः॥ मध्याह्ने श्राद्धवेला ॥१६॥
यां यो भक्षेद्दंतधावनं॥ निराशास्तस्य गच्छंति देवाः पितृगणैः सहे
ति दंतकाष्ठनिषेधे कर्तव्यमाह व्यासः॥ अलाभे दंतकाष्ठानां निषि
द्धायां तिथौ तथा॥ अपां द्वादशगंडूषैर्विदध्याद्दंतधावनं॥ तिथिग्र

४ स्मृत्यंतरेपि। तृणपर्णैः स दा कुर्यादमामेकादशीं विना। निषिद्धे दिवसे कुर्याज्जंबूप्लक्षाम्रपर्णकैरि ति

हणं निषिद्धकालोपलक्षणं॥ दंतकाष्ठालाभे वर्ज्यकाले च तृणप
र्णैर्वा द्वादशगंडूषैर्वा मुखसंशोध्य जिह्वोल्लेखः कार्य एव। तथा व्यासः॥
प्रतिपद्दर्शषष्ठीषु नवम्यां दंतधावनं॥ पर्णैरन्यत्र काष्ठैस्तु जिह्वोल्ले
खः सदैव तु॥ स्कांदे। अभ्यंगे चोदधिस्नाने दंतधावनमैथुने॥ जाते च
मरणे चैव तत्कालव्यापिनी तिथिः॥ दंतकाष्ठप्रमाणं विष्णुराह। द्वाद
शांगुलिकं विप्रे काष्ठमाहुर्मनीषिणः॥ शूद्रविट्क्षत्रजातीनां नवषड्
चतुरंगुलं॥ अत्रोत्तरार्धे व्युत्क्रमेणान्वयो बोध्यः॥ गर्गस्तु प्रमाणांतर
माह॥ दशांगुलं तु विप्राणां क्षत्रियाणां नवांगुलं॥ अष्टांगुलं तु वैश्यानां
शूद्राणां सप्तसंमितं॥ चतुरंगुलमानं तु नारीणां नात्र संशयः॥ नृसिं
हपुराणे॥ तिंतिणी वेणु पृष्ठं च आम्रनिंबौ तथैव च॥ अपामार्गश्च
बिल्वश्च अर्कश्चोदुंबरस्तथा॥ बदरी तिंदुकास्त्वेते प्रशस्ता दंतधा

Indira Gandhi National Centre for the Arts

आचारार्क

॥राम॥
॥१७॥

धावने॥ नारदोपि॥ सर्वे कंटकिनः पुण्याः क्षीरिणश्च यशस्विनः॥ प्रश
स्ताइतिशेषः॥ हद्दमनुरपि॥ खदिरस्य करंजस्य कदंबस्य तथैव च॥
अर्कस्य करवीरस्य कुटजस्य विशेषत इति॥ इहतेषां फलादिवद्धपिवे
क्तव्यं॥ विस्तरार्कापत्या न ब्रूमः॥ अंगिराः॥ प्रक्षाल्य भक्षयेत्काष्ठं प्रक्षा
ल्यैव तु संत्यजेत्॥ आयुरित्यादि मंत्रोयमुक्तः शाखानिमंत्रणे॥ शौ
नकः॥ पश्चाद्द्वादशगंडूषैर्विदध्याद्दंतधावनं॥ स्मृत्वोंकारं च गाय
त्रीं निबध्नीयाच्छिखांततइति॥ ॥अथ प्रयोगः॥ प्राङ्मुखः प्रतिप
त्षष्ठ्यष्टमी नवम्येकादशी द्वादशी चतुर्दशी पंचदशी संक्रांतिव्य ॥राम॥
तीपातव्रतोपवासश्राद्धदिनार्कभौमशुक्रमंददिननिषिद्धदिनाति ॥१७॥
रिक्तदिने पुश्राह्मणो द्वादशांगुलप्रमाणेन दशांगुलप्रमाणेन वाक
निष्ठांगुलिवत्स्थूलेनातितिक्ष्णाद्यादिविहितवृक्षोद्भवेन चूर्णीकृताग्रेण प्रक्षा

लितेन शुष्केणार्द्रेण वा॥ आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च॥ ब्र
ह्मप्रज्ञां च मेधां च त्वं नो देहि वनस्पते॥ इति मंत्रेणाभिमंत्रितेन काष्ठेन।
मुखदुर्गंधिनाशाय रदानां च विशुद्धये॥ ष्ठीवनाय च गात्राणां कुर्वेहं
दंतधावनमिति मंत्रमुक्त्वा दंतान् संशोध्य जिह्वोल्लेखं कृत्वा द्वादशगं
डूषांश्च कृत्वा चस्म्योंकारं गायत्रीं च स्मृत्वा शिखां बध्नीयादिति दं
तधावनप्रकरणं॥ ॥अथ प्रातःस्नानं हेमाद्रौ योगयाज्ञवल्क्यः॥ अग
म्यागमनात्पापं पापेभ्यश्च प्रतिग्रहात्॥ रहस्याचरितात्पापान्मुच्य
ते स्नानमाचरन्॥ अस्नात्वा नाचरेत्कर्म जपहोमादि किंचन॥ ला
लास्वेदसमाकीर्णः शयनादुत्थितः पुमान्॥ हेमाद्रौ दक्षः॥ अत्यंतम
लिनः कायो नवच्छिद्रसमन्वितः॥ स्रवत्येष दिवारात्रौ प्रातःस्नानं विशो
धनं॥ मार्कंडेयः॥ अस्नातस्य क्रियाः सर्वा भवंति विफला यतः॥ प्रातः

Indira Gandhi National
Centre for the Arts

॥राम॥ समाचरेत्स्नानंतच्चनित्यमितिस्मृतं॥ प्रातःस्नानंप्रशंसंति दृष्टादृ
॥१८॥ ष्टकरंहितत्॥ सर्वमर्हतिशुद्धात्मा प्रातःस्नायीजपादिकं॥ गुणादश
स्नानपरस्यसाधोरूपंचतेजश्चबलंचशौचं॥ आयुष्यमारोग्यमलो
लुपत्वंदुःस्वप्ननाशश्चयशश्चमेधा॥ तच्चत्रिविधमित्याहहेमाद्रौ
दक्षः॥ नित्यंनैमित्तिकंकाम्यंत्रिविधंस्नानमुच्यते॥ दर्भयुक्तंस्नानं
प्रशस्तमित्याहहारीतः॥ दर्भयुक्तंप्रशस्तंस्यात्स्नानंदानंजपादिकं॥
स्मृत्यंतरे॥ स्नानेहोमेजपेदानेस्वाध्यायेपितृकर्मणि॥ करौसदर्भौ ॥राम॥
कुर्वीततथासंध्याभिवंदने॥ विनादर्भेणयत्स्नानंयच्चदानंविनो ॥१८॥
दकं॥ असंख्यातंचयज्जप्तंतत्सर्वंनिष्फलंभवेत्॥ दर्भाश्चोक्ताः
प्रयोगपारिजाते॥ कुशाःकाशायवादूर्वाउशीराश्चसकुंदकाः॥ गोधू
माव्रीहयोमुंजादशदर्भाःसबल्वजाः॥ बल्वजंशुख्याईतृणं॥ कुशा

भावेतुकाशाःस्युःकाशाःकुशसमाःस्मृताः॥ काशाभावेगृहीतव्या
अन्येदर्भायथोचितं॥ व्यासः॥ कुशैःपूतंभवेत्स्नानंकुशेनोपस्प
र्शेद्द्विजः॥ कुशेनचोद्धृतंतोयंसोमपानेनसंमितं॥ कुशसंग्रहका
लउक्तःकात्यायनेन॥ मासेनभस्यमावास्यातस्यांदर्भोच्चयोमतः॥
अयातयामास्तेदर्भाविनियोज्याःपुनःपुनः॥ अत्रदर्भपदंकुशपर
मेव॥ दर्शेश्रावणमासस्यसमंत्रोत्पाटिताःकुशाइतिवृद्धोक्तेः॥
ण स्पर्शमंत्रैःकुशग्रहणाच्च॥ आनयनप्रकारमाहमार्कंडेयः॥ शुचि
र्भूत्वाशुचौदेशेस्थित्वापूर्वोत्तरामुखः॥ ओंकारेणैवमंत्रेणकु
शान्स्पृष्ट्वाद्विजोत्तमः॥ विरिंचिनासहोत्पन्नपरमेष्ठीनिसर्गज॥
दहस्वसर्वपापानिदर्भस्वस्तिकरोभव॥ हुंफट्कारेणदर्भांस्तुस
कृच्छित्वासमुद्धरेत्॥ कुशमाहमानमाहगोभिलः॥ कुशमूलेस्थि

Indira Gandhi National Centre for the Arts

तोब्रह्मा कुशमध्येतु केशवः॥ कुशाग्रे शंकरं विंद्यात्सर्वे देवाः समंत
तइति॥ कुशपवित्रमाहकात्यायनः॥ अनंतर्गर्भिणं साग्रं कौशं द्विद
लमेवव॥ प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥ मार्कंडेयः॥ च
तुर्भिर्दर्भपिंजूलै ब्राह्मणस्य पवित्रकं॥ एकैकन्यूनमुद्दिष्टं वर्णेव
र्णे यथाक्रमं॥ हेमाद्रौ॥ अन्यान्यपि पवित्राणि कुशदूर्वामयानि
च॥ हेमात्मकपवित्रस्य कलां नार्हंति षोडशीं॥ काम्ये चोक्तं शार
दायां॥ ताम्रतारसुवर्णानामर्कषोडशखेंदुभिः॥ कृता त्रिशक्ति
मुद्रेयं तीव्रदारिद्र्यनाशनी॥ इदं पवित्रं तर्जन्यां धारयंति सांप्र
दायिकाः॥ योगयाज्ञवल्क्यः॥ अनामिकाधृतं हेमं तर्जन्यां रौप्य
मेव च॥ कनिष्ठिकाधृतं खङ्गं तेन पूतो भवेन्नरः॥ रौप्यधारणमिदं
जीवत्पितृकभिन्नविषयं॥ तथा च प्रयोगपारिजाते॥ उत्तरीयं यो



गपट्टं तर्जन्यां रजतं तथा॥ न जीवत्पितृकैर्धार्यं ज्येष्ठो वा विद्यते यदी
त्यस्तु प्रसंगागतं॥ अथ प्रकृतमनुसरामः॥ बौधायनः॥ सप्ताहं प्रा
तरस्नायी संध्याहीनस्त्रिभिर्दिनैः॥ द्वादशाहमनग्निः स्याद्द्विजः
शूद्रत्वमाप्नुयात्॥ तद्दोषपरिहारार्थं भानुवारेपि शस्यते॥ भानुवा
रेत्ववश्यं प्रातः स्नानं कार्यमित्यर्थः॥ स्नानकालमाह दक्षः स एव॥ अ
रुणकिरणग्रस्तां प्राचीं दिशमवलोक्य स्नायादिति॥ स्नानं नद्या
दिषु कार्यमित्याह हेमाद्रौ मनुः॥ नदीषु देवखातेषु तडागेषु सरः
सु च॥ स्नानं समाचरेन्नित्यं गर्तप्रस्रवणेषु च॥ विवस्वान्॥ एके
तः सर्वतीर्थानि नाम सङ्ख्येकैवचान्यतः॥ ब्रह्मलोकेपि विरसः प
तितायां महीतले॥ मरीचिः॥ भस्मिष्ठमुद्धृतं वापि शीतमुष्णमथा
पि वा॥ गांगं पयः पुनात्याशु पापमामरणांतिकमिति॥ अथ स्ना



Indira Gandhi National
Centre for the Arts

नविधिः प्रयोगपारिजाते॥ न प्रातर्मृत्तिकास्नानं न कुर्याद्गोमयं निशि॥ प्रा
तःस्नानं सदा कुर्याद्गोमयेन विचक्षणः॥ मध्यंदिने मृदा स्नानं सायं
कार्यं जलेन वै॥ मनुः॥ खसंस्थं गोमयं ग्राह्यं भूमौ निपतिते पि वा॥ उ
पर्यधश्च संत्याज्यं संग्राह्यं मध्यमं हि तत्॥ नाभिमात्रे गे जले गत्वा त्रिः
कुर्यान्मज्जनं ततः॥ गात्राणां क्षालनं कृत्वा सम्यक् स्नायात्ततः परं॥
सम्यक् गोमयादि विधिनेत्यर्थः॥ आदाय गोमयं विप्रो वामपाणौ
निधाय च॥ व्याहृत्या तत्त्रिधा कृत्वा निक्षिपेत्प्रणवेन तु। दक्षिण
स्थितभागेन रक्षोहा नाय दिक्ष्वथ॥ तीर्थभागं क्षिपेद्भागमुत्त 
रं तारमंत्रितं॥ मानस्तोक इति मंत्रेण मध्यं चैवाभिमंत्रयेत्॥ मूर्धा 
दिपादपर्यंतं हस्ताभ्यां सुसमाहितः॥ गंधद्वारामित्यनया सर्वा
गमनुलेपयेत्॥ प्रार्थनादिमंत्रांस्तु प्रयोगे वक्ष्यामः॥ पुराणे॥

ततः नीस्थो स्वपुरतः कृत्वा मज्जेन्नदीमुखः॥ विष्णुः। स्रोतसोभिमु
खं स्नायान्नदीषु प्रवहज्जले॥ स्थावरे च तटाके च रवेरभिमुखं
सदा॥ वायवीये॥ संध्यामुखस्तु संध्यायां रात्रौ प्राङ्मुख एव सन्॥
स्रोतसोभिमुखं स्नानं मार्जनं चाघमर्षणं॥ अन्यत्रार्कमुखो रा
त्रौ प्रागुत्तरमुखोपि वा॥ कात्यायनः॥ पुत्रजन्मनिमित्ते तु सर्वेषामुत्तरा
मुखं॥ गृहे गृहमुखं स्नानं मार्जनादि तु नोभवेत्॥ प्रयोगपारि
जाते॥ आचम्य मार्जनं कुर्यादापो हिष्ठेति वारुणैः॥ इमं मे गंग
इत्युदकमालोड्य चाघमर्षणं॥ अंतर्जले मुखं कृत्वा कुर्यान्नासा
ग्रपीडनं॥ ऋतं चेति तृचं चैव द्रुपदां च ततो जपेत्॥ अष्टाक्षरं च
प्रणवं स्मरेद्विष्णुमजं प्रभुं॥ अष्टाक्षरमंत्रः नारदीये॥ तारं न
मःपदं पश्चान्नारो दीर्घसमन्वितौ॥ पवनो नाम मंत्रोयं प्रोक्तो

Indira Gandhi National Centre for the Arts

॥राम॥
॥२१॥

वस्त्रक्षरात्मकं रति॥ शौनकः॥ कुर्याद्द्वादशभिः स्नानं नामभिः केशवा
दिभिः॥ धन्यं यशस्यमायुष्यमारोग्यं बुद्धिवर्धनं॥ हस्ताभ्यां जलमा
दाय सकृदेवाभिमंत्रितं॥ मस्तके च मुखे बाह्वोर्हृदये पृष्ठदेशके॥ अ
भिषिंचेत्स्वमात्मानं गायत्र्या योनिमुद्रया॥ सप्तजन्मकृतं पापं तत्क्ष
णादेव नश्यति॥ कार्ष्णाजिनिः॥ देवर्षिपितॄणां चैव एकद्वित्रिक्रमेण
नो तु॥ जले दद्याज्जलं चात्र संस्कृतौ तटे तथा॥ असंस्कृतमृतानां
तु मित्यर्थः॥ असंस्कृतप्रमीतानामेकमेव तटे क्षिपेदिति बोधाय — राम
नोक्तेः॥ चतुर्विंशतिमते॥ स्नानादनंतरं तावत्तर्पयेत्पितृदेवताः॥ ॥२१॥
उत्तीर्य पीडयेद्वस्त्रं संध्याकर्म ततः परं॥ व्यासः॥ यज्ञोपवीती देवानां
निवीती ऋषितर्पणे॥ प्राचीनावीती पित्र्ये तु स्वेन तीर्थेन भावितः॥
उशनाः॥ द्वौ हस्तौ युग्मतः कृत्वा पू[illegible]दुदकांजलिं॥ गोशृंगमा

त्रमुद्धृत्य जलमध्ये जलं क्षिपेत्॥ हेमाद्रौ ब्रह्मभगवान्॥ स्नानांगत
र्पणं कृत्वा यक्ष्मणे जलमाहरेत्॥ नदीक्ष्मापनं कौर्मे॥ ज्ञानतोऽज्ञान
तो वापि यन्मया दुष्कृतं कृतं॥ तत्क्षमस्वाखिलं देवि जगन्मातर्नमोऽस्तु
ते॥ स्मृत्यंतरे॥ विकिरे पिंडदाने च तर्पणे स्नानकर्मणि॥ आचांतः
सन्न प्रकुर्वीत दर्भसंत्यजनं बुधः॥ ॥अथ वस्त्रधारणं दक्षस्मृतौ॥
श्रुतिस्मृतिप्रमाणेन ग्राह्यं वस्त्रं च धारयेत्॥ षट्कर्मनिरतो विप्रो
ग्राह्यं वस्त्रं न धारयेत्॥ षट्कर्माणि चोक्तानि स्मृत्यंतरे॥ स्नानं सं
ध्या जपो होमः स्वाध्यायः पितृतर्पणं॥ मनुः॥ ब्राह्मणस्यासितं वस्त्रं
मांजिष्ठं नृपतेः स्मृतं॥ पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते॥ ॥
याज्ञवल्क्यः॥ अष्टहस्तं नवं श्वेतं सदशं नान्यधारितं॥ अहतं तद्द्विजा
नीयात्सर्वकर्मसु पावनं॥ कच्छा नाभ्यां सव्ये एव॥ वामकुक्षौ च नाभौ
च पृष्ठे चैव यथाक्रमं॥ त्रिकच्छेन समायुक्तो द्विजो सो मुनिरुच्यते॥

Indira Gandhi National
Centre for the Arts

विष्णुपुराणे। होमदेवार्चनाद्यासु क्रियासु पठने तथा॥ नैकवस्त्रः प्र
वर्तेत द्विजो नाचमने जपे॥ द्वितीयवस्त्राभावे तु परिधानवस्त्रे वर्णेवो
त्तरीयं कार्यं। एकं चेद्वासो भवति तस्यैवोत्तरवर्गेण प्रछादयीतेति पार
स्करगृह्यात्॥ उत्तर्याभावे वस्त्रस्योर्ध्वभागउत्तर्यं कुर्याद्द्वितियो गौश्च
रवचनाच्च॥ स्मृत्यंतरे॥ ॥यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि॥
तृतीयमुत्तरीयार्थे वस्त्राभावे चतुर्थकं॥ आचारमयूखादिग्रंथेषु
तु वस्त्राभावे तदिष्यत इति पाठः॥ परशुरामनिबंधे तु। उपवस्त्रं य
दा न स्यात्तदा चत्वारि धारयेदिति यज्ञोपवीतप्रकरणे उक्तं॥ आर्द्रव
स्त्रमूर्ध्वमार्गेण निष्कासनीयमित्युक्तं प्रयोगपारिजाते। स्नानं
कृत्वार्द्रवस्त्रं तु ऊर्ध्वमुत्तारयेद्द्विजः॥ आर्द्रवस्त्रमधस्ताच्चेत्पुनः स्ना
नेन शुध्यति॥ इदं च गृहस्नानविषयं॥ ऊर्ध्वमुत्तारयेद्वस्त्रं गृहे न चाम
धस्त्यजेदित्याचारादर्शे बौधायनोक्तेः॥ ॥अथ प्रसंगाद्गृहस्नानवि



धिरुच्यते॥ व्यासः॥ शीतास्वाप्सु निषिच्योष्णा स्नामंत्रसंभारयोगतः॥
गृहे पि शस्यते स्नानं तद्धि हीनफलं स्मृतं॥ यमः॥ आप एव सदा पूतास्ता
सां वह्निर्विशोधकः॥ तस्मात्सर्वेषु कालेषु उष्णांभः पावनं स्मृतं॥ पा
दौ प्रक्षालयेत्पूर्वं मुखं यज्ञोपवीतकं॥ द्विराचम्य कराभ्यां च धर्मान्ध
त्वानि खानि स्पृशेत॥ प्राणायामं ततः कुर्यात्कालज्ञानं यथोदितं॥ आपो
हिष्ठेति सूक्तेन इमं मे गंगे इत्यथ॥ अतो देवेति सूक्तेन सावित्र्या च वि
शोधयेत॥ शीतोदकं तु दद्यैश्च पश्चादुष्णोदकं क्षिपेत्॥ अत्र मार्जना
द्विनिषेधमाह बौधायनः॥ ॥गृहस्नाने न तु प्रोक्तं मार्जनं तर्पणादि
कं॥ नांतराचमनं प्रोक्तं पश्चादाचम्य शुध्यति॥ संग्रहे॥ स्ना*नमध्ये
नाचमनं मार्जनं तर्पणं च न॥ वस्त्रस्य पीडनं नैव संकल्परहितं तथा॥
संकल्परहितं स्नानमध्ये संकल्परहितं न तु सर्वथा संकल्पवर्जितमि

Indira Gandhi National
Centre for the Arts

त्यर्थः॥ गृहे गृहमुखं स्नानं मध्ये संकल्पवर्जितामिति बृहद्धर्मोक्तेः॥ के
॥राम॥ चित्तु गृहस्नाने संकल्पमेव नेच्छंति तदसत्॥ संकल्पं च यथा कुर्यात्स्ना
॥२३॥ नदानव्रतादिके॥ अन्यथा पुण्यकर्माणि निष्फलानि भवंति चेति मा
र्कंडेयवाक्यात्संकल्पस्यावश्यकोक्तेः॥ ॥इति स्नानविधिः॥ ॥अ
थ प्रयोगः॥ अरुणोदयेंतरिक्षस्थं गोमयं संगृह्य तदभावे भूमिष्ठ
येवोपर्यधश्च संत्यज्य मध्यस्थं गृहीत्वान्यां स्नानसामग्रीं चादाय गं
गादितीर्थमेत्य पूतजलेन मुखं पाणिपादौ च प्रक्षाल्येष्टदेवतां स्मृत्वा ॥राम॥
नाभिमात्रजले गत्वा त्रिर्निमज्यांगक्षालनं कृत्वा देशकालौ स्मृत्वा ॥२३॥
मम कायवाङ्मनः कृतकर्मदोषपरिहारद्वारा श्रीपरमेश्वरप्री
त्यर्थं प्रातःस्नानं करिष्ये इति संकल्प्य गोमयं सव्ये पाणौ कृत्वा॥ ॐ
भूर्भुवः स्वरिति त्रिधा विभज्य दक्षिणभागं प्रणवेन प्राच्यादिदिक्षु

निक्षिप्योत्तरभागं च तथैव तीर्थे निक्षिप्य मध्यमभागं मानस्तोक इति
मंत्रेणाभिमंत्र्य। गंधद्वारां दुराधर्षां नित्यपुष्टां करीषिणीं॥ ईश्वरीं सर्व
भूतानां तामिहोपह्वये श्रियं॥ अग्रमग्रं चरंतीनामोषधीनां वने वने॥ ता
सामृषभपत्नीनां पवित्रं कायशोधनं॥ त्वं मे रोगांश्च शोकांश्च नुद गो
मय सर्वदेति मंत्राभ्यां मूर्धादि सर्वांगमनुलिप्य॥ हिरण्यशृंगं वरुणं
प्रपद्ये तीर्थं मे देहि याचितः। यन्मया भुक्तमसाधूनां पापेभ्यश्च प्रतिग्र
हः॥ यन्मे मनसा वाचा कर्मणा वा दुष्कृतं कृतं॥ तन्न इंद्रो वरुणो बृहस्प
तिः सविता च पुनंतु पुनः पुनरिति द्वाभ्यां वरुणं संप्रार्थ्य बद्धशिखः पु
रतः कृत्वा प्रवहज्जले प्रवाहाभिमुखस्त्रिवारमवगाह्य शरीरं प्रक्षाल्या
पो हि ष्ठेति नवर्चसूक्तेन मार्जनं विधायांगुष्ठमूलेन जलं प्रदक्षिणमालो
डयेत्॥ तत्र मंत्रः॥ इमं मे गंग इत्यस्य प्रैयमेध सिंधुर्नद्यो जगती जलालो

Indira Gandhi National Centre for the Arts

॥राम॥
॥२८॥

उनेविः। ॐ इमंमेगंगे० इत्यालोड्य जलेमुखंकृत्वा नासाग्रं संपीड्याघमर्ष
णं कुर्यात् ऋतंचेति तृचेन। ततः ॐ नमो नारायणायेत्यष्टाक्षरं मंत्रं द्रुपदा
दिवेमुमुचानः स्विन्नः स्नात्वोमलादिव॥ पूतंपवित्रेणवाज्यमापःशुंधंतु
मैनस इति च जपित्वा। ॐ विष्णुं च स्मृत्वा केशवादिदामोदरांतैर्द्वादश
नामभिर्द्वादशावृत्त्वा आप्लुत्य योनिमुद्रया जलमादाय। मूर्ध्नि मुखे
बाह्वोर्हृदये पृष्ठदेशे गायत्र्याभिषिंच्य॥ नंदिनी नलिनी सीता माल
ती च मलापहा॥ विष्णुपादार्घसंभूता गंगा त्रिपथगामिनी॥ भागीरथी
भोगवती जाह्नवी त्रिदशेश्वरी॥ द्वादशैतानि नामानि यत्र यत्र जला ॥राम॥
शये॥ स्नानयुक्तः सदा ब्रूयात् तत्र तत्र वसाम्यहं॥ इति गंगावाक्यं पठि ॥२८॥
त्वा नाभिमात्रजलगतः स्नानांगतर्पणं कुर्यात्॥ तच्चेत्थं॥ प्राङ्मुखः
साक्षताभिरद्भिरुपवीती॥ ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि १ भू

र्देवां० २ भुवर्देवां० ३ स्वर्देवां० ४ भूर्भुवः स्वर्देवां० ५ पंचमंत्रैरेकैकमंजलिं देव
तीर्थेन दत्वा निवीत्युदङ्मुखः कृष्णद्वैपायनादयो ये ऋषयः तान् ऋषीं
स्तर्पयामि। भूर्ऋषीं० २ भुवर्ऋषीं० ३ स्वर्ऋषीं० ४ भूर्भुवः स्वर्ऋषींस्तर्पया
मीति पंचभिर्द्वौ द्वावंजली सयवाभिरद्भिः प्राजापत्यतीर्थेन दत्वाथ दक्षि
णामुखः प्राचीनावीती पितृतीर्थेन सतिलाभिरद्भिः॥ सोमः पितृमा
न्यमोंगिरस्वानग्निष्वात्ताग्निकव्यवाहनादयो ये पितरः॥ तान् पितॄंस्त० १
भूः पितॄं० २ स्वः पितॄं० ४ भूर्भुवः स्वः पितॄं० ५ मीति पंचभिस्त्रिस्त्रिस्तर्पयि
= भुवः पितॄं० ३ त्वा तीरमेत्य॥ अग्निदग्धाश्च ये जीवा ये प्यदग्धाः कुले मम॥
भूमौ दत्तेन तोयेन तृप्ता यांतु परां गतिमिति मंत्रेणांजलिं तटे निक्षि
प्य॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते गृह्णंतु मया दत्तं व
स्त्रनिष्पीडनोदकमिति वस्त्रं तीरे निष्पीड्योपवीती॥ यन्मया दूषितं
तोयं शारीरमलसंचयात्॥ तद्दोषपरिहारार्थं यक्ष्माणं तर्पयाम्यहमि

Indira Gandhi National
Centre for the Arts

त्तियश्च तर्पणं विधाय स्त्वौ क्षौ शुक्लं वासः परिधायोत्तरीयार्थं द्वितीयं प्रावृत्य चतुर्गुणीकृतं परिधानीयमुपरिदशं निष्पीड्य द्विराचम्य तिलकं कुर्यात॥ ॥अथ तिलकं प्रयोगपारिजाते॥ ललाटे तिलकं कृत्वा संध्याकर्म समाचरेत॥ अकृत्वा भालतिलकं तस्य कर्म निरर्थकं॥ मृद्भस्म चंदनं प्रोक्तं तोयं चैव चतुर्थकं॥ स्नात्वा पुंड्रं मृदा कुर्याद्धुत्वा चैव तु भस्मना॥ देवानभ्यर्च्य गंधेन जलमध्ये जलेन तु॥ मृदोर्ध्वपुंड्रं भस्मना तिर्यक् चंदनेनोभयमित्याह कात्यायनः॥ ऊर्ध्वपुंड्रं मृदा कुर्याद्भस्मना तु त्रिपुंड्रकं॥ उभयं चंदनेनैव अभ्यंगोत्सवरात्रिषु॥ ऊर्ध्वपुंड्रस्यावश्यकत्वमुक्तं सारसमुच्चये॥ ऊर्ध्वपुंड्रविहीनस्य श्मशानसदृशं मुखं॥ अवलोक्य मुखं तस्य श्रीसूर्यमवलोकयेत॥ ब्रह्मनारदीये॥ स्नानं दानं जपो होमः संध्या स्वाध्यायकर्मसु॥ ऊर्ध्वपुंड्रविहीनेन तत्सर्वं निष्फलं स्मृतं॥ ॥ ॥राम॥ ॥२५॥

ब्रह्मपुराणे॥ गंगातीरसमुद्भूतां मृदं मूर्ध्नो बिभर्ति यः॥ बिभर्ति रूपं सोऽर्कस्य तमोनाशाय केवलं॥ तिलकस्थानानि ब्रह्मांडे॥ ललाटे केशवं विंद्यान्नारायणमथोदरे॥ माधवं हृदये न्यस्य गोविंदं कंठकूपके॥ विष्णुं च दक्षिणे कुक्षौ तद्भुजे मधुसूदनं॥ त्रिविक्रमं कर्णमूले वामकुक्षौ तु वामनं॥ श्रीधरं च हृषीकेशं वामयोर्बाहुकर्णयोः॥ पद्मनाभं पृष्ठदेशे ककुद्दामोदरं स्मरेत॥ मूर्ध्नि मूलेन मंत्रेण शेषं द्वादशनामभिः॥ संकर्षणादिभिः कृष्णशुक्ले वे केशवादिभिः॥ व्यासस्तु॥ वामहस्ते जलं कृत्वा सावित्र्या चाभिमंत्रितं॥ तद्विष्णोरिति मंत्रेण मर्दयेदग्निकोंततः॥ अतो देवेति सूक्तेन तिलकं कारयेत्सदेत्याह॥ एवं यथासंप्रदायं तिलकं कृत्वा संध्यां कुर्यात॥ ॥अथ संध्याविधिः॥ ॥मरीचिः॥ संध्या येन न विज्ञाता संध्या येनानुपासिता॥ जीवमानो भवेच्छूद्रो मृतः श्वा चापि जायते॥ इति सं

Indira Gandhi National
Centre for the Arts

ध्यानित्यत्वमुक्तं॥ दक्षः।संध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु॥ य
॥राम॥ दन्यत्कुरुते कर्म न तस्य फलभाग्भवेदिति शुचित्वसंपादनेन कर्मांगत्व
॥२६॥ मप्युक्तं॥ तत्र प्रातःसंध्याया एवेति केचित्। श्रीमाता महचरणास्तु संध्या
त्रयस्यापि वचनांतरप्राप्तत त्संध्याकाले तत्तरभावित तत्कर्मांगत्वमिति
युक्तमुत्पश्यंति॥ संध्याकालो धर्मसारे॥ उत्तमा तारकोपेता मध्यमा लुप्त
तारका॥ अधमा सूर्यसहिता प्रातः संध्या त्रिधा मता॥१॥ उत्तमा सूर्य
सहिता मध्यमा लुप्ततारका॥ कनिष्ठा तारकोपेता सायं संध्या त्रिधा मता
॥२॥ ॥प्रयोगपारिजाते॥ उदयास्तमयादूर्ध्वं यावत्स्याद्घटिकात्रयं॥ ॥राम॥
तावत्संध्यामुपासीत प्रायश्चित्तं ततः परं॥ तत्रैव गाता तपीये॥ संध्या ॥२६॥
कालेत्वतिक्रांते स्नात्वाचम्य यथाविधि॥ जपेदष्टशतं देवीं ततः संध्यां
समाचरेत्॥ मदनपारिजाते तु॥ कालातिक्रमणे चैव चतुर्थार्घ्यं प्रदा
पयेदित्युक्तं॥ शौनकः॥ प्राणानायम्य विधिवद्वाग्यतः संयतेंद्रियः॥

॥अथ संध्यामुपासिष्ये इति संकल्प्य मार्जयेत्। स एव। नासिकामंगुली
भिस्तु तर्जनीमध्यमाद्दते॥ सव्येन तु समाकृष्य दक्षिणेन तु न विसर्जये
त्॥ प्रणवव्याहृतीः सप्त गायत्रीं शिरसा सह॥ त्रिः पठेदायतप्राणः प्राणा
यामः स उच्यते॥ कात्यायनः॥ दक्षिणे रेचनं कुर्याद्वामेन पूरितोदरं॥ कुं
भकेन जपं कुर्यात्प्राणायामो भवेदिति॥ प्रयोगपारिजाते। पंचांगुली
भिर्नासाग्रं पीडयेत्प्रणवेन वै॥ मुद्रेयं सर्वपापघ्नी वानप्रस्थगृहस्थ
योः॥ कनिष्ठानामिकांगुष्ठैर्यतेश्च ब्रह्मचारिणः॥ तिसृभिर्मार्जनं कु
र्यादापोहीति कुशोदकैः॥ प्रतिपादैः क्षिपेन्मूर्ध्नि प्रतिप्रणवसंयुतं॥ ऋ
ग्विधाने। नवप्रणवसंयुक्तेन आपोहिष्ठात्र्येन तु॥ संवत्सरकृतं पापं
मार्जनांते विनश्यति॥ प्रजापतिः॥ ऋगंते मार्जनं कुर्यात्पादांते वा समाहि
तः॥ अर्धर्चांते थवा कुर्यात् शिष्टानां मतमीदृशं॥ मंत्राचमनमाह शौन
कः॥ अथाचमनमादाय सूर्यश्चेति पिबेदपः॥ अथ मध्यंदिने त्वापः पु
=नंतु सायं त्वग्निश्चेति॥ नमो हस्तं प्रतिष्ठाप्य नद्यादौ मार्जनं चरेत्॥ न कुर्याद्दक्षिणे दासा=
रोरवं नरकं व्रजेत्॥२

Indira Gandhi National
Centre for the Arts

आचारार्के आपस्तंबः॥ गंगायां वापिकायां च तटाके च विशेषतः॥ वामहस्ते जलं गृह्य न कुर्यान्मार्ज
नं द्विजः॥ गृहे तु॥ पात्रस्थितोदके नैव वामहस्तस्थिते न वा॥ संध्यायां मार्जनं कुर्यान्मा

॥राम॥ र्जनं त्विति च मंत्रत इति। मार्जनांतराण्याह स एव॥ प्रणवेन व्याहृतिभिर्गा
॥२७॥ यत्र्या प्रणवाद्यया॥ आपो हि ष्ठेति सूक्तेन मार्ज० न हि चतुर्थकं॥ इमानि मा
र्जनानि गृहे पात्रांतरमादाय कार्याणि॥ तथा च पारिजाते॥ नद्यां तीर्थे ह्र
दे तत्र भाजनेन स्मृतं गृहे॥ औदुंबरे च सौवर्णे राजते दारुसंभवे॥ कृत्वा
तु वामहस्ते वा संध्योपास्तिं समाचरेत्॥ औदुंबरं ताम्रं वा महस्ते तु स
र्वथा पात्रांतराभावे बोध्यमिति श्रीमातामहचरणाः॥ ॥पात्रा
कृतिमाह मरीचिः॥ गोकर्णाकृतिवत्पात्रं ताम्रं रौप्यं च हाटकं॥ जलं त राम
त्र विनिक्षिप्य संध्योपासनमाचरेत्॥ ॥अथ पापपुरुषमाह शौनकः॥ ॥२७॥
उद्धृत्य दक्षिणे हस्ते जलं गोकर्णवत्कृते॥ निःश्वास्य नासिकाग्रे तु पा
प्मानं पुरुषं स्मरेत्॥ तज्जलं नावलोक्याथ वामभागे क्षितौ क्षिपेत्॥ अ
थार्घ्यदानं गृह्यपरिशिष्टे॥ ॥अथाचम्य दर्भपाणिः पूर्णमुदकांज

[illegible]

लिरादित्याभिमुखः स्थित्वा प्रणवव्याहृतिपूर्वया सावित्र्या त्रिर्निवेदयं
न्नुत्क्षिपेत्तदेवार्घ्यनिवेदनं॥ असावादित्यो ब्रह्मेति प्रदक्षिणं परितः पेन्न
परिषिच्याप उपस्पृशेदिति॥ शौनकः॥ ईषन्नम्रः प्रभाते तु मध्याह्ने
ऋजुसंस्थितः॥ द्विजोऽर्घ्यं प्रक्षिपेद्व्यासायं तूपविश्य भुवि॥ मदनरत्ने
व्यासः॥ कराभ्यां तोयमादाय गायत्र्या चाभिमंत्रितं॥ आदित्याभिमु
खस्तिष्ठन् त्रिरूर्ध्वं संध्ययोः क्षिपेत्॥ सकृदेव तु मध्याह्ने क्षेपणी
यं द्विजातिभिरिति॥ ॥अथ गायत्रीजपस्तत्रैव॥ ॥धृत्वा पवित्रं संप्रो
क्ष्य जपस्थानं कुशोदकैः॥ आधारादीन्नमस्कृत्य कुशाग्रे रासनं ततः॥
बध्वा पद्मासनं वापि स्वस्तिकं वा यथासुखं॥ ॐ भूर्भुवः स्वरोमिति ज
पित्वा रुह्यासनं हि ततः॥ ॥गृह्यपरिशिष्टेपि॥ शुचौ देशे दर्भाभ्यां सा
क्षिते दर्भानास्तीर्य व्याहृतिभिरुपविश्य प्राणायामत्रयं कृत्वा

Indira Gandhi National
Centre for the Arts

नंव्याहृतिशिरश्युक्ष्यसावित्र्या ऋषिदैवतछंदास्यनुस्मृत्य षड्भिस्तदं
गमंत्रैर्यथांगमात्मनिन्यस्यात्मानंतद्रूपंभावयन्ध्यात्वाऽगच्छवरदेदे
वीत्यावाह्यतिष्ठन्नर्धनक्षत्रेषामंडलदर्शनान्मंत्रार्थमनुसंदधानः सप्र
णवव्याहृतिपूर्वकांसावित्रींजपेदिति। जपेसंख्यास्मृत्यंतरे॥ सायंप्रा
तश्चमध्याह्नेसावित्रीवाग्यतोजपेत्॥ सहस्रपरमांदेवींशतमध्यांद
शावरां॥ ॥व्यासः॥ अष्टोत्तरशतंनित्यमष्टाविंशतिमेववा॥ विधिना
दशकंवापित्रिकालेषुजपेद्बुधः॥ ततउद्धास्यगायत्रीमुत्तमेत्यनुवाकं
तः॥ अयंचगायत्रीजपस्तीरमेत्यस्थलेचित्रासनादौकार्योनतुजले॥ क 
दाचिदपिनोविद्वान्गायत्रीमुदकेजपेत्॥ गायत्र्यग्निमुखीप्रोक्तातस्मा
दुत्थायतांजपेत्॥ इतिश्रीदत्तगोभिलवचनात्॥ यत्तुआर्द्रवासाजले
कुर्यात्तर्पणाचमनंजपम्॥ इति हारीतवचस्तद्गायत्रीजपव्यतिरि

क्तविषयमिति॥ ॥आसनान्याहव्यासः॥ ॥कौशेयंकंबलंचैवअजिनं
पट्टमेवच॥ दारुजंतालपत्रंवाआसनंपरिकल्पयेत्॥ कृष्णाजिनेज्ञान
सिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि॥ वंशाजिनेव्याधिनाशः कंबलेदुःखमो
चनं॥ अभिचारेनीलवर्णरक्तवश्यादिकर्मणि॥ शांतिकेकंबलः प्रोक्तः
सर्वेष्टंचित्रकंबलं॥ वंशानामवंध्याम्नगीतिव्याख्यातंमयूखे॥ ॥ज
पमालोक्तातंत्रांतरे॥ अंगुलीगणनादेकंरेखयाष्टगुणंभवेत्॥ कुश
ग्रंथ्याकोटिशतंरुद्राक्षैः स्यादनंतकं॥ ॥अक्षगणनाप्रजापुक्ताप्रजा
पतिना॥ ॥अष्टोत्तरशतंकुर्याच्चतुःपंचाशिकांतथा॥ सप्तविंश
तिकांवापिततोनैवाधिकावरा॥ अवरान्यूना॥ एतच्चगायत्रीजपातिरि
क्तजपेज्ञेयं॥ उक्तंचमालाप्रकरणेब्रह्मयामलेगायत्रीकल्पेच॥ ॥पर्व
भिस्तुजपेद्देवींमालाकाम्यजपेस्मृता॥ गायत्र्यावेदमूलत्वाद्वेदःप
र्वसुगीयते॥ पर्वक्रमोप्युक्तस्तत्रैव॥ आरभ्यानामिकामध्यंपर्वा

Indira Gandhi National
Centre for the Arts

ण्युक्तान्यनुक्रमात्॥ तर्जनीमूलपर्यंतं जपेद्दशसु पर्वसु॥ मध्यमांगुलि
मूलेतु यत्पर्वद्वितयं भवेत्॥ तं वै मेरुं विजानीयाज्जपेत्तन्नातिलंघयेत्॥
॥ ॥वृद्धमनुः॥ ॥वस्त्रेणाच्छादितकरं दक्षिणं यः सदा जपेत्॥ तस्य स्या
त्सफलं जप्यं तद्धीनमफलं स्मृतं॥ अतएव तिर्यक्कुसं विचारकल्पिताकेन
विद्वद्भिमतावृद्धेनजप[illegible]शीलेन जपार्थं सा च गोमुखीति व्यवह्रियते
लोकैः॥ तस्यास्त्वन्यत्किंचिन्मूलं न पश्यामः॥ ॥अथोपस्थानं शौनकः॥
॥ ॥सायंप्रातरुपस्थानं कुर्यान्मंत्रैर्यथाक्रमं॥ जातवेदस इत्येकातच्छंयो
राहृणीमहे॥ नमो ब्रह्मण इत्येतैरुपतिष्ठेद्द्विजः प्रति॥ तत्रैव॥ प्रातः सूर्य
मुपस्थाय मित्रस्य चर्षणीधृत इति॥ भगवान्॥ त्र्यंबकमिति मंत्रेण
नमो ब्रह्मण इत्यथ॥ मित्रस्य चर्षणीद्वाभ्यां प्रातःकाले विशेषत इति॥ ग
ह्यपरिशिष्टे॥ प्रदक्षिणं दिशः साधियान्नत्वा संध्यायै नमः सावित्र्यै न
मो गायत्र्यै नमः सर्वाभ्यो देवताभ्यो नमस्कृत्य॥ ततउत्तमे शिखरे

राम
॥२१॥

देवी भूम्यां पर्वतमूर्धनि॥ ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथासु
खमिति संध्यां विसर्ज्य भद्रन्नो अपिवातय मन इति उक्त्वा शांतिं चत्रि
रुच्चार्य प्रदक्षिणं परिक्राम न्नासत्यलोकात्पातालादालोकालोक
पर्वतान्॥ ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नम इति नमस्कृत्याभ
मिमुपसंगृह्य गुरून्वृद्धांश्चोपसंगृह्णीयाद्देवं सायमिति॥ ॥अथप्र
योगः॥ ॥आसने उपविश्याचम्य ब्रह्मचारी कनिष्ठानामिकांगुष्ठै
र्गृहस्थः पंचांगुलीभिर्नासां धृत्वा वामरंध्रेण वायुमापूर्य निरोधे
न कुंभके कृते प्रणवस्य परब्रह्म ऋषिः॥ परमात्मा देवता। देवीगाय
त्री छंदः॥ सप्तानां व्याहृतीनां विश्वामित्र जमदग्नि भरद्वाज गोत
मात्रि वसिष्ठ कश्यपा ऋषयः॥ अग्निवाय्वादित्य बृहस्पति वरुणें
द्र विश्वेदेवा देवताः॥ गायत्र्युष्णिगनुष्टुप्बृहती पंक्ती त्रिष्टुप् जग

Indira Gandhi National
Centre for the Arts

त्य श्छंदांसि॥ गायत्र्या विश्वामित्र ऋषिः। सविता देवता॥ गायत्री
छंदः॥ गायत्रीशिरसः प्रजापति ऋषिः॥ ब्रह्माग्निवाय्वादित्यादेव
ताः॥ यजुश्छंदः॥ प्राणायामे विनियोगः॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ
महः। ॐ जनः। ॐ तपः ॐ सत्यं। ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि। धियो यो नः प्रचोदयात्॥ ओमापो ज्योती रसोमृतं ब्रह्म
भूर्भुवः स्वरोम्॥ एवं त्रिरुक्त्वा दक्षिणरंध्रेण वायुं शनैर्विसृज्य।
चम्यमम उपात्तदुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं प्रातः संध्या
[illegible] मुपासिष्ये॥ इति संकल्प्यापोहिष्ठेति तृचेन प्रथममार्जनं कुर्यात्।
तृचेस्य॥ आपोहिष्ठेति तृचस्यांबरीषः सिंधुद्वीप ऋषिः आपो गायत्री॥ ॥राम॥
मार्जने विनियोगः॥ ॐ आपो हिष्ठा मयो भुवः। ॐ ता न ऊर्जे दधात ॥३०॥
न। ॐ महे रणाय चक्षसे॥ ॐ यो वः शिवतमो रसः। ॐ तस्य भाज

यतेह नः। ॐ उशतीरिव मातरः। ॐ तस्मा अरंगमाम वः। ॐ यस्य
क्षयाय जिन्वथ। ॐ आपो जनयथा च नः॥ इति प्रणवयुतैर्नवभिः पा
दैः शिरो मार्जयित्वा मंत्राचमनं कुर्यात् तद्यथा॥ हस्तेन जलमा
दाय। सूर्यश्चेति याज्ञवल्क्य उपनिषद ऋषिः॥ सूर्यमन्युमन्यु
पतिरात्रयो देवताः प्रकृतीछंदः। आचमने विनि०॥ ॐ सूर्यश्च मा मेत्रा
मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः। पापेभ्यो रक्षंतां। यद्रात्र्या पा
पमकार्षं। मनसा वाचा हस्ताभ्यां। पद्भ्यामुदरेण शिश्ना। रात्रिस्त
दवलुंपतु॥ यत्किंच दुरितं मयि॥ इदमहं माममृतयोनौ सूर्ये ज्यो
तिषि जुहोमि स्वाहेति जलं पीत्वाचम्य। समस्तव्याहृतीनां प्रजा
पतिर्ऋषिः॥ प्रजापतिर्देवता॥ बृहतीछंदः। गायत्र्या विश्वामित्र ऋ
षिः॥ सविता देवता। गायत्री छंदः। मार्जने वि०। ॐ भूर्भुवः स्वरिति शि

Indira Gandhi National
Centre for the Arts

तीयं॥ ॐ तत्सवितुरित्तिगायत्र्या तृतीयं चकृत्वापोहिष्ठेति नवर्चेन चतुर्थ
॥राम॥ मार्जनं कुर्यात्॥ आपो हिष्ठेति नवर्चस्य सू तस्या ओं बरीष आपो गायत्री॥
॥२१॥ पंचमी वर्धमाना सप्तमी प्रतिष्ठा अंत्ये द्वे अनुष्टुभौ॥ मार्जने विनि॰॥ ॐ
आपो हिष्ठा॰ तन॥ ॐ महेरणाय चक्षसे॥ ॐ यो वः शिवतमो॰ यते ह
नः॥ ॐ उशतीरिव मातरः॥ ॐ तस्मा अरंग॰ जिन्वथ॥ ॐ आपो ज
नयथा च नः॥ ॐ शं नो देवी रभिष्टय॰ पीतये॥ शंयोरभिस्रवंतु नः॥ ॐ ॥राम॥
ईशाना वार्याणां॰ णीनां॥ ॐ अप्सु मे॰ ॐ = मिभेषजं॥ ॐ अप्सु
मे सोमो॰ षजा॥ ॐ अग्निं च विश्वशंभुवं॥ ॐ आपः पृणीत भेषजं व
र्म॥ ॐ ज्योक् च सूर्यं दृशे॥ ॐ इदमापः प्रवहत य॰ मयि॥ ॐ यद्वाह
मभि॰ नृतं॥ ॐ आपो अद्या॰ रसाहि॥ ॐ पयस्वा॰ वर्चसेति प्रत्यृचं
मोंकार पूर्वं शिरसि मार्जनं कृत्वा घमर्षणं कुर्यात्॥ गोकर्णाकार॰

जलपूर्णं चुलकं नासिकांते नीत्वा प्राणान्निरुध्य। ऋतं चेति तृचस्या
घमर्षण ऋषिः भाववृत्तो देवता। अनुष्टुप् छंदः। अघमर्षणे विनि
योगः॥ ॐ ऋतं च सत्यं॰ ततो रात्र्यजायत॰ समुद्रादर्णवादधि॰ अ
होरात्राणि॰ सूर्याचंद्रमसौ॰ दिवं च पृथिवीं॰ स्व इति जपित्वा दक्षि
ण नासा बिलात् पाप पुरुषं निःसारितं भावयन् वामभागे जलं क्षि
पेत्। आचम्य पूर्णोदकांजलिरादित्याभिमुखस्तिष्ठन्। गायत्र्या वि
श्वामित्रः सविता देवता। गायत्री छंदः अर्घ्यदाने वि॰॥ ॐ भूर्भुवः
स्वरिति = ऋषिः = तिव्याहृति पूर्वां सावित्रीं पठित्वा श्री सूर्यायेदम ॥रा
र्घ्यं समर्पयामीति जलमूर्ध्वं प्रक्षिपेदेवं त्रिः कृत्वा असावादित्यो
ब्रह्मेत्यात्मानं प्रदक्षिणं परिषिच्य गायत्रीं जपेत्॥ कुशोदके ॥राम॥

Indira Gandhi National
Centre for the Arts

न जपस्थानं प्रोक्ष्यासनं विन्यस्य। ॐ भूर्भुवः स्वरोमिति जपित्वासने
पद्मासने वोपविश्य। पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता॥ त्वं
॥राम॥ च धारय मां देवि पवित्रं कुरु चासनं॥ अपसर्पंतु ये भूता ये भूता भुवि
॥३२॥ संस्थिताः॥ ये भूता विघ्नकर्तारस्ते नश्यंतु शिवाज्ञया॥ अपक्रामं
तु भूतानि पिशाचाः सर्वतो दिशं॥ सर्वेषामविरोधेन ब्रह्मकर्म स
मारभे दिति भूतशुद्धिं कृत्वा। तम्य प्राणायामत्रयं कृत्वा पुनराच
म्य स्नानं व्याहृतिशिरःस्पृश्य गायत्र्या विश्वामित्रः सविता गायत्री
जपे वि०। तत्सवितुर्हृदयाय०। वरेण्यं शिरसे स्वाहा। भर्गो देवस्य शि ॥राम॥
खायै०। धीमहि कवचाय हुं। धियो यो नो नेत्रत्रयाय वौ०। प्रचोदया ॥३२॥
दस्त्राय फट्। अस्त्रेणैव दिग्बंधं कृत्वा देवतां ध्यायेत्। बालां बाला
दित्यमंडलमध्यस्थां रक्तवर्णां रक्तांबरानुलेपनस्रगाभरणां

चतुर्वक्त्रां दंडकमंडल्वक्षसूत्राभयां चतुर्भुजां हंसासनारूढां ब्रह्मदै
वत्यां ऋग्वेदमुदाहरंतीं भूर्लोकाधिष्ठात्री गायत्री नामदेवतां ध्यात्वा॥
आगच्छ वरदे देवि जप्ये मे संनिधा भव॥ गायंतं त्रायते यस्माद्गायत्री तेन
सोच्यते॥ इत्यावाह्य मनसा संस्पृश्यौत्तरसहस्रमष्टोत्तरशतमष्टावि
शति वा आपत्तौ दशवारं वा गायत्री=षो=जपित्वा॥ सहस्रपरमां देवीं श
तमध्यां दशावरां॥ आसूर्यदर्शनात्तिष्ठेत्ततस्तूपविशेत वा॥ पूर्वां संध्यां
सनक्षत्रामुत्तरां सदिवाकरां॥ उत्तरामुपविश्यैव वाग्यतः सर्वदा जपेत्॥
पुनः षडंगन्यासं विधायोपस्थानं कुर्यात्। जातवेदस इति मारीचः क
श्यपो जातवेदा अग्निस्त्रिष्टुप्। उपस्थाने०। ॐ जातवेदसे०। मित्रस्येति
चतसृणां गाथिनो विश्वामित्रो गायत्री। उपस्थाने वि०। ॐ मित्रस्य च
र्षणीधृतो०४। त्र्यंबकं वसिष्ठो रुद्रोनुष्टुप्। उपस्थाने०। त्र्यंबकं० तं

Indira Gandhi National
Centre for the Arts

योरावृणीमहे॰। प्राच्यै दिशे याश्च देवता एतस्यां प्रतिवसंत्येताभ्यश्च नमो
नमः। दक्षिणायै दिशे॰ प्रतीच्यै दिशे॰ उदीच्यै दिशे॰ ऊर्ध्वायै दिशे॰ अधरा
यै दिशे॰ अवांतरायै दिशे॰ नमः॥ संध्यायै॰ सावित्र्यै॰ गायत्र्यै॰ सर्वाभ्यो
देवताभ्यो नमो नमः॥ कामोकार्षीत् मन्युरकार्षीन्नमो नमः॥ उत्तमे शि
खरे देवि भूम्यां पर्वतमूर्धनि। ब्राह्मणेभ्यो ह्यनुज्ञाता गच्छ देवि यथा
सुखं॥ स इन्द्रो अपि शातयमनः॥ शांतिः शांतिः शांतिरिति। त्रिरुक्त्वा
प्रदक्षिणं परिक्रामन्नासत्यलोकात्पातालादालोकालोकपर्वतान्॥
ये संति ब्राह्मणा देवास्तेभ्यो नित्यं नमो नम इति। नमस्कृत्य गुरुमभि
वादयेत्॥ स्वस्तिकाकारहस्ताभ्यां कर्णौ स्पृष्ट्वा आंगिरस बार्हस्पत्य भा
रद्वाजेति त्रिप्रवरान्वित भारद्वाजगोत्रोत्पन्नोहं श्रीधरशर्मा भो गुरो
त्वामभिवादयामीति स्वस्वप्रवराद्युच्चार्याभिवाद्य द्विराचमनं कुर्या
दिति॥ ॥अथोपासने॥ दक्षः। संध्याकर्मावसाने तु स्वयं होमो वि



धीयते॥ ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः॥ एतैरपि हुतं यत्स्या
त्तद्धुतं स्वयमेव तु॥ विट्पतिर्जामाता॥ आश्वलायनसूत्रेपि॥ ॥स्वयं पत्न्य
पि वा पुत्रः कुमार्यंतेवासी वेति॥ असमक्षं तु दंपत्योर्होतव्यं नर्त्विगादिना॥
द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकमिति॥ कात्यायनोक्तेरुभयोः संनिधौ
होतव्यमिति मुख्यः कल्पोन्यतरसंनिधौ त्वनुकल्प इति॥ ॥भरद्वाजः॥
होमं वैतानिकं कृत्वा स्मार्तं कुर्याद्विचक्षणः॥ स्मृतीनां वेदमूलत्वात्स्मा
र्तं केचित्पुरा विदुः॥ विदुः॥ बहुशुष्केंधने चाग्नौ सुसमिद्धे हुताशने॥ विधू
मे लेलिहाने च होतव्यं कर्मसिद्धये॥ यो नर्चिषि जुहोत्यग्नौ व्यंगारे चैव मा
नवः॥ मंदाग्निरामयावी च दरिद्रश्चापि जायते॥ ॥अथाग्निप्रादुष्करण
माह कात्यायनः॥ सूर्ये तु शैलमप्राप्ते षड्भिंशद्भिरिहांगुलैः॥ प्रादु
ष्करणमग्नीनां प्रातर्भासामदर्शने इति॥ सायंप्रातर्होममाह कात्याय
काल

॥राम॥ ॥२४॥

नः॥ यावत्सम्यङ् नभाव्यंते नभस्यक्षाणि सर्वतः॥ लोहितत्वं च नापैति ता
वत्सायं तु हूयते। उदितेऽनुदिते चैव समयाध्युषिते तथेति। मुख्यकाला
तिक्रमे गौणकालमाह सूत्रकारः॥ प्रदोषांतो होमकालः संगवांतः प्रातः
स्तमतिनीय चतुर्गृहीतमाज्यं जुहुयादिति। विस्तरस्त्वस्मन्मातुः प्रपिताम
हभट्टश्रीनारायणपदपाथोजविरचिते प्रयोगरत्ने द्रष्टव्यः॥ ॥होम
द्रव्याणि गृह्यपरिशिष्टे॥ पयोदधिसर्पिर्यवागूरोदनं तंदुलाः सोमस्तै
लमापो व्रीहयो यवास्तिला इति होम्यानि॥ ॥बौधायनः॥ व्रीहीणां वा
यवानां वा शतमाहुतिरिष्यते॥ संग्रहे॥ द्रव्यं हविः स्रुवेणैव पाणिना ॥राम॥
कठिनं हविरिति॥ ॥अथ प्रयोगः॥ अर्घ्यानंतरं प्रादुष्कृतस्याग्नेः पश्चा ॥२५॥
दुपविश्य तिथ्यादि संकीर्त्य मम उपात्त॰ प्रातरौपासनहोमं करिष्ये इति
संकल्प्य॥ चत्वारि शृंगा वामदेवोऽग्निस्त्रिष्टुप्। अग्निमूर्तिध्याने॰॥ ॐ

चत्वारि शृंगा॰ आ विवेश॥ सप्तहस्तश्चतुःशृंगः सप्तजिह्वो द्विशीर्षकः॥
त्रिपात्प्रसन्नवदनः सुखासीनः शुचिस्मितः॥ स्वाहां तु दक्षिणे पार्श्वे देवीं
वामे स्वधां तथा॥ बिभ्रद्दक्षिणहस्ते तु शक्तिमन्नं स्रुचं स्रुवं॥ तोमरं व्यज
नं वामे घृतपात्रं च धारयन्॥ आत्माभिमुखमासीन एवंरूपो हुताश
नः॥ एषो ह देवः प्रदिशोनु सर्वाः पूर्वो ह जातः स उ गर्भे अंतः॥ स विजा
यमानः स जनिष्यमाणः प्रत्यङ्मुखांस्तिष्ठति विश्वतोमुखः॥ अग्ने वैश्वा
नर शांडिल्यगोत्र मेषध्वज मेषारूढ प्राङ्मुखः सन्मम संमुखो भवेति
ध्यात्वाग्नेरीशानदिशमारभ्य प्रदक्षिणं जलेन परिसमूह्य परिस्तीर्य
पर्युक्ष्य हविःपात्रमग्नेरुत्तरतो निधाय ज्वलता दर्भोल्मुकेनावज्वाल्य
प्रोक्ष्य तेनैव त्रिः पर्यग्नि कृत्वा तदुल्मुकं निरस्याप उपस्पृश्याग्नेः पश्चि
मतः कुशोपरि हविर्निधाय। विश्वानि न इति तिसृणां वसुश्रुतोऽग्निस्त्रि

Indira Gandhi National
Centre for the Arts

ष्टुप्। द्वाभ्यामर्वनेत्योपस्थाने वि०। ॐ विश्वानि नो दुर्गहा जातवेदः।
सिंधुं न० अंत्ययाउपस्थायवि धूमे अग्नौ रातसंख्यान् तं दुलान् द
क्षिणपाणिनाऽन्यं चेद्रव्यं हविः तदा स्रुवेणादाय। सूर्याय स्वाहा॥ सू
र्यायेदं०। प्रजापतये स्वाहा। प्रजापतय इदं०। ततः परिस्तरणमग्नेरुत्त
रतो विसृज्य पूर्ववत्परिसमूहनपर्युक्षणे कृत्वोपस्थानं कुर्यात्॥
सूर्यो नो दिवस्पात्वित्यस्य चक्षुः सूर्यो गायत्री॥ सूर्योपस्थाने० ॐ
सूर्यो नो दिवस्पातु० १ चित्रं देवानामांगिरसः कुत्सः सूर्यस्त्रिष्टुप्। 
सूर्योपस्थाने वि० ॐ चित्रं देवाना० २ प्रजापते हिरण्यगर्भः प्रजा 
पतिस्त्रिष्टुप्॥ प्रजापत्यु०। ॐ प्रजापते० इत्युपस्थाय विभूतिं धा
रयेत्॥ मानस्तोके तिकुत्सो रुद्रो जगती। विभूतिग्रहणे०। ॐ मान
स्तोके०। त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषं २ अगस्त्यस्य त्र्यायु

षं ३ यद्देवानां त्र्यायुषं ४ तन्मे अस्तु त्र्यायुषं ५ शतायुषमिति ६ ललाट
कंठनाभिस्कंध हृदयशिरः सु विभूतिं धृत्वा। तिष्ठन्नो वमे स्वरश्च मेय
ज्ञोपवतेन मश्च॥ यन्ते न्यूनं तस्मै तउपयत्ते तिरिक्तं तस्मै ते नमः।
अग्नये नमः स्वस्ति श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलं।
आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन श्रीं देहि मे हव्यवाहनों नमो
नमः॥ ततः स्थित्वा यस्य स्मृत्या चेत्युक्त्वा कर्मेश्वरार्पणं कुर्यादि
ति॥ ॥सूतके होमप्रकारमाह जातूकर्ण्यः॥ ॥सूतके तु समुत्प
न्ने स्मार्तकर्म कथं भवेत्॥ पिंडयज्ञं चरुं होमम सगोत्रेण कार
येदिति॥ पिंडयज्ञः पिंडपितृयज्ञः॥ चरुः स्थालीपाकः। श्रवणा
कर्मादिश्च वैश्वदेवा नेश्वरः॥ ॥अथ पूजाविधिर्मात्स्ये। प्रातर्म
ध्यंदिने सायं देवपूजां समारभेत्॥ अशक्तौ विस्तरेणैव प्रा

andhi National
Centre for the Arts

तः संपूज्य केशवं॥ मध्याह्ने चैव सायं च पुष्पांजलिमथाक्षिपेत्॥ स्कां
दे॥ कामासक्तोऽथवा क्रुद्धः शालग्रामशिलार्चनात्॥ भक्त्या
वा यदि वा भक्त्या कलौ मुक्तिमवाप्नुयात्॥ शिलाप्युक्ता प्रयोगपा
रिजाते॥ शिलाप्यामलकीतुल्या पूज्या सूक्ष्मैव या भवेत्॥ यथा यथा
शिला सूक्ष्मा तथास्यात्तु महत्फला॥ ॥तत्रैव स्कांदे॥ शिवनाभिस्तु
तः॥ यवमात्रं तु गर्तः स्यादथवार्धं लिंगमुच्यते॥ शिवनाभिरिति ख्या
तास्त्रिषु लोकेषु दुर्लभः॥ भारते॥ कलौ कलिकल्मषध्वंसं सर्वपापह ॥राम॥
रं हरिं॥ स्कांदे॥ ब्रह्मा कृतयुगे देवस्त्रेतायां भगवान्हरिः॥ द्वापरे भ ॥३६॥
गवान्विष्णुः कलौ देवो महेश्वरः॥ ॥शिवपूजनं बाणलिंगेऽतिप्रश
स्तमुक्तं भविष्ये॥ बाणलिंगानि राजेंद्र ख्यातानि भुवनत्रये॥ न प्रति

ष्ठा न संस्कारस्तेषामावाहनं न चेति॥ हेमाद्रौ॥ पक्वजंबूफलाकारं
कुक्कुटांडसमाकृति॥ भुक्तिमुक्तिप्रदं चैव बाणलिंगमुदाहृतं॥ श्रीसू
र्यपूजोक्ता भविष्यपुराणे॥ अग्निहोत्रादिवेदाश्च यज्ञाश्च बहुदक्षि
णाः॥ सूर्यार्चनस्य चैवैते कोट्यंशेनापि नो समाः॥ मेरुमंदारतुल्यो
पि राशिः पापस्य दारुणः॥ आराध्य भास्करं मर्त्यस्तन्नाशयति
तत्क्षणात्॥ प्रदद्याद्यो गवां लक्षं दोग्ध्रीणां वेदपारगे॥ एकाहमर्च
येद्भानुं तस्य पुण्यं ततोऽधिकं॥ गृहस्थस्य पंचायतनपूजोक्ता प
रशुरामनिबंधे॥ कूर्मपुराणे॥ ॥स्नानं संध्या तथा होमं गृहस्थो
क्तेन वर्त्मना॥ कृत्वा सूर्यं गणपतिं लक्ष्मीमीशं तथा हरिं॥ पौ
रुषेण तु सूक्तेन नित्यमर्चां समारभेत्॥ अर्चने नाममंत्रोऽप्युक्तः

Indira Gandhi National
Centre for the Arts

॥राम॥ ॥३७॥ आचारमयूखे श्राद्धे। ॐकारादिसंयुक्तं नमस्कारांतकीर्तनं॥ स्वनामसर्वस
त्वानां मंत्र इत्यभिधीयते॥ ॐ सूर्याय नम इत्यादि। वाजपेययाजिनस्तु
श्लिष्टमंत्रेण पंचायतन[illegible]जनमित्याहुः॥ युक्तंतु ऋग्गते श्लिष्टमंत्रमु
च्चार्य पाद्यादि निवेदयेदिति॥ पंचायतनस्थापनप्रकारो ज्ञानमाला
यां॥ सहस्रांशुं यदा मध्ये ऐशान्यां पार्वतीपतिं॥ आग्नेय्यामेकदंतं च नै
ऋत्यामच्युतं तथा॥ वायव्यां पूजयेद्देवीं योगमोक्षैकदामिति सूर्यपं ॥राम॥
चायतनं॥१॥ हेरंबं तु यदा मध्ये ऐशान्यामच्युतं यजेत॥ आग्नेय्यां पंच ॥३७॥
वक्त्रं तु नैर्ऋत्यां जगदंबिकां॥ वायव्यां द्युमणिं चैव यजेन्मंत्री समाहितः इ
ति॥ गणपतिपंचायतनं॥२॥ भवानी तु यदा मध्ये ऐशान्यां माधवं यजे
त॥ आग्नेय्यां पार्वतीनाथं नैर्ऋत्यां गणनायकं॥ प्रद्योतनं तु वायव्या
मा चार्य स्तु प्रपूजयेत॥ इति लक्ष्मीपंचायतनं॥३॥ शंकरं तु यदा

मध्ये ऐशान्यां श्रीपतिं यजेत॥ आग्नेय्यां च तथा हंसं नैर्ऋत्यां पार्वती
सुतं॥ वायव्यां च सदा पूज्या भवानी भक्तवत्सलेति शिवपंचायतनं४
यदा तु मध्ये गोविंदं ऐशान्यां शंकरं यजेत॥ आग्नेय्यां गणनाथं च नै
ऋत्यां तपनं तथा॥ वायव्यामंबिकां चैव यजेन्मंत्री समाहित इति विष्णु
पंचायतनं॥५॥ स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः॥ तन्मं
उल्लंघितो राजा साधकश्च विनश्यतीति। बोपदेवश्च॥ शंभौ मध्यगं

| | | | | | |
|---|---|---|---|---|---|
| शि ग | वि शि | वि शि | वि सू | शि ग | तेहरीनहरम्भ |
| सू | ग | भ | शि | वि | देव्याहरोशंकरे |
| प वि | सू दे | सू ग | भ ग | भ सू | भास्यनागसुत |

रक्षोहरगणेशाजांबिका स्थापिताः॥ देव्यां विष्णुशिवैकदंतरवयो
लंबोदरे जेश्वरे नार्याः शंकरभागतोतिसुखदा व्यस्तास्तु ते हानिदा॥७॥

Indira Gandhi National Centre for the Arts

आचारमयूखे ब्राह्मे। ॐकारादिसंयुक्तं नमस्कारांतकीर्तनं॥ स्वनामसर्वस
त्वानांमंत्र इत्यभिधीयते। ॐ सूर्यायनम इत्यादि। वाजपेययाजिनस्त
श्लिष्टमंत्रेण पंचायतन[illegible]जनमित्याहुः॥ युक्तंतु ऋग्गते श्लिष्टमंत्रमु
च्चार्य पाद्यादिनिवेदयेदिति॥ पंचायतनस्थापनप्रकारो ज्ञानमाला
यां॥ सहस्रांशुं यदामध्ये ईशान्यां पार्वतीपतिं॥ आग्नेयामेकदंतं च नै
ऋत्यामच्युतं तथा॥ वायव्यां पूजयेद्देवीं सोगमो क्षैकभूमिति सूर्यपं
चायतनं॥१॥ हेरंबंतु यदामध्ये ईशान्यामच्युतं यजेत॥ आग्नेय्यांपंच
वक्रंतु नैऋत्यां जगदंबिकां॥ वायव्यां द्युमणिं चैव यजेन्मंत्री सुतं इतइ
ति॥ गणपतिपंचायतनं॥२॥ भवानीतु यदामध्ये ईशान्यां माधवं यजे
त॥ आग्नेय्यां पार्वतीनाथं नैऋत्यां गणनायकं॥ प्रद्योतनं तु वायव्या
माचार्यस्तु प्रपूजयेत॥ इति लक्ष्मीपंचायतनं॥३॥ शंकरं तु यदा 

मध्ये ईशान्यां श्रीपतिं यजेत॥ आग्नेयां च तथा हंसं नैऋत्यां पार्वती
सुतं॥ वायव्यां च सदा पूज्या भवानी भक्तवत्सलेति शिवपंचायतनं ४॥
यदा तु मध्ये गोविंदं ऐशान्यां शंकरं यजेत॥ आग्नेय्यां गणनाथं च नै
ऋत्यां तपनं तथा॥ वायव्यामंबिकां चैव यजेन्मंत्री समाहित इति विष्णु
पंचायतनं॥५॥ स्वस्थानवर्जिता देवाः शोकदुःखभयप्रदाः॥ तन्मं
उल्लस्थितो राजा साधकश्च विनश्यतीति। बोपदेवश्च॥ शंभौ मध्यगं

| | | | | | |
|---|---|---|---|---|---|
| शि ग | वि शि | वि शि | वि सू | शि ग | तेहरीनहरस्त |
| सू | ग | भ | शि | वि | देव्योहरोशंकरे |
| भ वि | सू दे | सू ग | भ ग | म सू | भास्यनागसुत |

रवौ हरगणेशाजांबिकास्थापिताः॥ देव्यां विष्णुशिवैकदंतरवयो
लंबोदरेजेश्वरेनार्याः शंकरभागतोति सुखदाव्यस्तास्तु तेहानिदः॥१॥

Indira Gandhi National
Centre for the Arts

अस्यायमर्थः॥ शंभौ मध्यगते सति शंकरभागतः ईशानकोणादारभ्य
आग्नेयादिकोणेषु हरीनहरभूदेव्यः स्थाप्याः तथा च ईशाने विष्णुः आ
ग्नेये इनः सूर्यः २ नैर्ऋत्ये हरभूर्गणेशः ३ वायव्ये देवीति ४ हरौ मध्यगते स
ति ईशानादिकोणेषु शंकरेभास्यनागसुताः। ईशाने शंकरः। १ आग्नेये
इभास्यो गणपतिः। २ नैर्ऋत्ये सूर्यः। ३ वायव्ये अगसुता देवी। ४ रवौ मध्य
गते सति ईशानादि॰ हरगणेशाजांबिकाः। ईशाने हरः १ आग्नेये गणेशः २
नैर्ऋत्ये विष्णुः। ३ वायव्ये अंबिका ४ देव्यां मध्यगतायां सत्यां। ईशाना
दि॰। विष्णुशिवैकदंतरवयः ईशाने विष्णुः १ आग्नेये शिवः २ नैर्ऋत्ये गणे
शः। ३ वायव्ये सूर्यः। ४। लंबोदरे मध्यगते सति ईशानादि॰ अजेश्वरेना
र्याः। ईशाने विष्णुः। १ आग्नेये शिवः २ नैर्ऋत्ये सूर्यः ३ वायव्ये देवीति क्रमः। ४
अत्र ईशान्यादिकल्पना॥ यत्रैव भानुरस्तु वियदुदेति प्राचीतु तां वेदवि



दो वदंतीति गौतमोक्त प्राचीमनुसंधाय द्रष्टव्या॥ यत्तु॥ पूज्यपूजकयोर्म
ध्ये प्राची प्रोक्ता विचक्षणैः॥ प्राच्येव प्राची सोद्दिष्टा मुक्ता वै देवपूजनमिति
विष्णुयामलवाक्यं तत्तांत्रिकपूजाविषयं। उक्तं च श्रीमातामहचरणैराचारमयूखे पूज्यपूज्यकांतः प्राची आगमोक्तपूजायामेव तत्परिभाषा
या उक्तत्वादिति॥ ॥पंचायतनपूजाक्रमो पि तत्रैवोक्तः॥ मुख्ये पुष्पां
जलिं दत्वा गणेशाद्यर्चनं भवेत्॥ गणेश एव मुख्यश्चेत्तस्य सूर्यक्रमा
द्भवेदिति॥ वचनात्प्रधानदेवतायां पुष्पांजल्यंतं पूजाकांडं समाप्य प
दार्थानुसमयेन गणेशादीनर्चयेदिति॥ शारदातिलकटीकायां
तु पुष्पांजलिं मुख्ये आदौ दत्वा अर्चनं कार्यमित्युक्तं॥ वस्तुतस्त्वय
मपि पूजाक्रमस्तांत्रिकपूजायामेव ज्ञेयः॥ तत्रैवोक्तत्वात्॥ वैदिक

Indira Gandhi National
Centre for the Arts

पूजायां तु स्थापनक्रम एव॥ अत एव [illegible] पेययाजिभिः [illegible] नोवे २२
॥राम॥ विघ्नगणेशसूर्यदुर्गाभ्यो नम इति [illegible] मंत्र उक्तो विष्णुपंचायतने॥ सू
॥३९॥ र्यपंचायतनपूजने तु क्रम उक्तः पद्मपुराणे॥ ॥आदित्यं गणनाथं च दे
वीं रुद्रं यथाक्रमं॥ नारायणं विशुद्धाख्यमंते च कुलदेवता॥ तथा तत्रै
व॥ रविर्विनायकश्चंडी ईशो विष्णुस्तु पंचमः॥ अनुक्रमेण पूज्यंते व्यु
त्क्रमेण महद्भयमिति॥ सूर्यातिरिक्तपंचायतनादिपूजायामप्या राम
दौ सूर्यपूजां विधाय॥ विष्ण्वादिदेवानां पूजा कार्या॥ तदुक्तं ब्राह्मे॥ ॥३९॥
अपूज्य प्रथमं सूर्यमपरान्यः प्रपूजयेत्॥ तेन तु तत्कृतं पापं संप्रतीच्छं न्त
ति देवता इति॥ इदं च पूजनं भूतशुद्धिं प्राणप्रतिष्ठां मातृकान्यासं
च विधाय कार्यमिति प्रयोगपारिजातादयः॥ शौनकेऽपि॥ कृत्वा भू

तशुद्धिं च मातृकान्यासमाचरेदिति पूजाप्रकरणे उक्तं॥ तथा च श्रुतिः॥ दे
वो भूत्वा देवान्यजेदिति॥ रामतापिन्यां च॥ देवो भूत्वा यजेद्देवं नादेवो देव
मर्चयेत्॥ मंत्रमहोदधावपि॥ देवार्चायोग्यताप्राप्त्यै भूतशुद्धिं समाच
रेत्॥ एवं मूलवाक्यानुसारेणेत्यर्थः॥ मूलवाक्यानि तु ग्रंथविस्तृति
भिया नोक्तानि तानि मूले तमंत्रमार्तंडे द्रष्टव्यानीति दिक्॥ ॥अ
थ पुरुषसूक्तविधानं ऋग्विधाने॥ अर्चनं संप्रवक्ष्यामि विष्णोरमित
तेजसः॥ यत्कृत्वा मुनयः सर्वे परं निर्वाणमाप्नुयुः॥ अनुष्टुभस्य
सूक्तस्य त्रिष्टुभं तस्य देवता॥ पुरुषो यो जगद्बीजं ऋषिर्नारायणः
स्मृतः॥ प्रथमां विन्यसेद्वामे द्वितीयां दक्षिणे करे॥ तृतीयां वामपा
दे वै चतुर्थीं दक्षिणे न्यसेत्॥ पंचमी वामजानौ तु षष्ठीं वै दक्षिणे
न्यसेत्॥ सप्तमीं वामकट्यां तु अष्टमीं दक्षिणे तथा॥ नवमीं नाभिम

Indira Gandhi National
Centre for the Arts

ध्येतु दशमी हृदयेतथा॥ एकादशीकं ठमध्ये द्वादशीवामबाहुके॥ त्रयो
॥राम॥ दशीदक्षिणेतु तथैवास्ये चतुर्दशी॥ अक्ष्णोः पंचदशी चैव विन्यसेन्म
॥४०॥ र्ध्नि षोडशी॥ एवंन्यासविधिंकृत्वा पंचांगानि समाचरेत्॥ ब्राह्मणोस्ये
त्यादिकाभिर्ऋग्भिः पंचांगकल्पना॥ हृदयं च शिरः शिखा कवचं चा
स्त्रमेव च॥ यथा देहे तथा देवे न्यासं कृत्वा यथाविधि॥ एवं न्यासवि
धिं कृत्वा पश्चात्पूजां समारभेत्॥ न्यासेन तु भवेत्सोपि स्वयमेव ज
नार्दनः॥ आद्ययावाहयेद्देवम चातु पुरुषोत्तमं॥ द्वितीययासनं द ॥राम॥
द्यात्पाद्यं चैव तृतीयया॥ अर्घ्यं चतुर्थ्या दातव्यं पंचम्याचमनीय
कं॥ षष्ठ्या स्नानं प्रदेयं तु सप्तम्या वस्त्रमेव च॥ यज्ञोपवीतमष्टम्या ॥४०॥
नवम्या चंदनं स्मृतं॥ पुष्पं दशम्या दातव्यमेकादश्या तु धूपकं॥ द्वा
दश्या दीपकं दद्यात्त्रयोदश्या निवेदनं॥ चतुर्दश्या नमस्कारं पंच

दश्या प्रदक्षिणाः॥ उद्वासनं तु षोडश्या उपचारास्तु षोडश॥ स्नाने व
स्त्रे च नैवेद्ये दद्यादाचमनीयकं॥ कृत्वा षोडशाभिर्मंत्रैः षोडशान्नस्य
चाहुती॥ हविदाज्यस्येति पाठः॥ पुनः षोडशाभिर्मंत्रैर्दद्यात्पुष्पाणि
षोडश॥ तत्त्वसर्वं जपेद्भूयः पौरुषं सूक्तमेव च॥ षण्मासात्सिद्धिमा
प्नोति ह्येवमेव समर्चनात्॥ अत्र यद्यप्यावाहनं विसर्जनं चोक्तं तत्र
त्यहं प्राणप्रतिष्ठापूर्वकप्रतिमादिपूजनविषयं॥ अन्यत्र त्वादावंते पु
ष्पांजलिं दद्यात्॥ आदावंते च मंत्राभ्यां पुष्पांजलिसमर्पणादिति
नारदीयवाक्यात्॥ वस्त्रं प्रत्यहं ननवीनं किंतु समर्पितमेवाभ्युक्ष्य
समर्पयेत्॥ तदुक्तं तत्वसागरे॥ वस्त्रमभ्युक्षणाद्बुध्येदपरं तु दिने
दिने॥ आचारमयूखे मंत्रराजविधौ॥ प्रतिमापरयंत्राणि नित्यं
स्नानं न कारयेत्॥ कारयेत्पर्वदिवसे यथामलनिवारणमिति॥

Indira Gandhi National
Centre for the Arts

आचारार्क॰

अथपूजोपयुक्तानिपुष्पाणि॥ ॥तत्रादौसूर्यपूजायांविहितानिभविष्य
॥राम॥ पुराणे॥मालतीमल्लिकाचैवदूर्वाचाशोककर्णिका॥पाटलाकरवीराणि
॥४१॥ जयाजयतिरेवच॥चंपकंबकुलंचैवतथैवागस्तिकिंशुकौ॥भास्करस्य
प्रशस्तंपूजार्थंघ्राणेयतानिनित्यशः॥नीलोत्पलसहस्रेण नीलोत्प
लशतेनच॥रक्तैश्चकरवीरैश्चयस्तुपूजयतेरविं॥वसेदर्कपुरेश्री
मान्सूर्यतुल्यपराक्रमइति॥ ॥अथविहितपत्राणि॥बिल्वपत्रंश
मीपत्रंभृंगराजस्यपत्रकं॥तमालपत्रंचहरेःसद्यस्तुष्टिकरंरवेः॥ ॥राम॥
तुलसीकालतुलसीतथारक्तंचचंदनं॥केतकीपत्रकुसुमंसदैवतप ॥४१॥
नप्रियमिति॥ ॥अन्यानिगणेशादिपूजायांविहितानिषिद्धानि
ग्रंथविस्तृतिभियेहनोक्तानितानिआचारमयूखादिग्रंथेभ्योवगं
तव्यानि॥तत्रापूर्वाभावेपर्युषितान्यपिग्राह्याणीत्युक्तंस्मृत्यंतरे॥

पंकजंपंचरात्रंस्याद्दशरात्रंचबिल्वकं॥तुलस्येकादशाहात्तुपुनःप्र
क्षाल्यपूजयेत्॥स्कांदे॥गंगाजलंत्र्यहाद्ग्राह्यंपूजनेभक्तिसंयुतैः
भविष्ये॥नाक्षतैरर्चयेद्विष्णुंनतुलस्यागणेश्वरं॥अक्षतानिषेध
स्तुशालग्रामपरः॥शालग्रामशिलामेवनाक्षतैरर्चयेद्द्विजइति॥विष्णू
क्तेः॥उक्तंचवार्तिके॥सामान्यविधिरस्पष्टःसंह्रियेतविशेषतइति॥
तथा॥नांगुष्ठेमर्दयेद्देवंनाधःपुष्पैःसमर्चयेत्॥कुशाग्रैर्नक्षिपेत्तो
यंवज्रपातसमंभवेत्॥ ॥मदनरत्नेमरीचिः॥विधायदेवतापूजां
प्रातर्होमादनंतरं॥गुरूक्तेनतुमार्गेणमूलमंत्रंततोजपेदिति॥ ॥
अथपूजाप्रयोगः॥आचम्यदेशकालौस्मृत्वामामोपात्त० यथाशक्त्या
यथाज्ञानंयथामीलितोपचारैःश्रीसूर्यादिपूजांकरिष्ये॥तदंगत्वे
नात्मशुध्यर्थंभूतशुध्यादिकरिष्ये।इतिसंकल्प्य॥पृथ्वित्यस्यमेरु

Indira Gandhi National
Centre for the Arts

पृष्ठः कूर्मः सुतलं। आसने॰ पृथ्वि त्वया॰ अपसर्पंतु वामदेवो भूतान्यनु
ष्टुप्॥ भूतोत्सादने वि॰ अपसर्पंतु॰। अपक्रामंतु भूतानि॰ समारभ इति
पादतलपार्श्वेन भूमिं त्रिः प्रहृत्य देवान्ध्यायांतु। यातुधाना अपयांतु।
विष्णो देवयजनं रक्षस्व॥ एवा पित्रेत्यस्य वामदेवो बृहस्पतिर्विश्वे देवा
त्रिष्टुप्॥ मनुष्यगंधनिवारणे विनि॰। ॐ एवा पित्रे विश्वदेवाय वृष्णे॰ ~
रयीणां॥ आगमार्थं तु देवानां गमनार्थं तु रक्षसां कुरु घंटे रवं नाद दे
वतास्थानसंनिधाविति॥ घंटां वादयित्वा भूतशुद्धिं कुर्यात्॥ ॥मू
लाधारे कुंडलिनीं ध्यात्वा हुमित्युत्थाप्य सुषुम्नामार्गेण हृदयस्थं 
जीवं ब्रह्मणि हंस इति विलाप्य। पादादिजान्वंतं पृथिवीं लं बीजयु 
तां ध्यात्वा जान्वादि नाभ्यंतं वं बीजयुतं जलं ध्यात्वा। नाभ्यादि हृद
यांतं रं बीजयुतमग्निं ध्यात्वा। हृदादि भ्रूमध्यांतं यं बीजयुतं वायुं
ध्यात्वा॥ भ्रूमध्यादि ब्रह्मरंध्रांतं हं बीजयुतमाकाशं ध्यात्वा भूतानि

प्रत्येकं संविलापयेत्॥ पृथिवीमप्सु संहरामि॥ ~ जलमग्नौ सं॰ अग्निं वा
यौ सं॰। वायुमाकाशे सं॰ आकाशमहंकारे सं॰ अहंकारं महत्तत्वे सं॰ म
हांतं प्रकृतौ सं॰ प्रकृतिं शुद्धब्रह्मणि सं॰ आत्मानं ब्रह्माहमस्मीति ध्या
त्वा दक्षिणकुक्षावधोमुखं पापपुरुषं ध्यात्वा। यमिति बीजेन द्वात्रिं
शद्वारमावर्तितेन वामनासया वायुमापूर्य। रमिति बीजेन चतुःषष्टि
वारमावर्तितेन कुंभकं कृत्वा पुनर्यमिति बीजेन षोडशवारमावर्ति
तेन पापभस्म दक्षिणनासया रेचयेत्॥ ततो वमित्यमृतबीजेन दे
होत्थंभस्म संप्लाव्य लमिति बीजेनैकीकृत्य सुवर्णभावयित्वा ह
मिति बीजेन सर्वांगान्युद्धृत्य कनकमयं शरीरं ध्यात्वा पुनरात्मनःस
काशादाकाशः संभूतः। आकाशाद्वायुः वायोरग्निः अग्नेरापः अद्भ्यः
पृथिवीति भूतान्युत्पाद्य स्वस्थानगानि ध्यात्वा सोहमिति मंत्रेण

Indira Gandhi National
Centre for the Arts

कुंडलीसहितं जीवं हृद्यानीय सुधामयं जीवं हृदि निधाय कुंडलिनीमू
 लाधारगतां ध्यात्वेति भूतशुद्धिः॥ ॥अथ प्राणप्रतिष्ठा॥ ॥अस्य प्रा
 णप्रतिष्ठामंत्रस्य ब्रह्मविष्णुरुद्रा ऋषयः॥ ऋग्यजुःसामानि छंदांसि।
प्राणशक्तिर्देवता॥ आं बीजं। क्रौं शक्तिः॥ प्राणस्थापने वि॰। ब्रह्मविष्णु
रुद्रेभ्यो नमः शिरसि। ~~प्राणशक्तिर्देवता॥~~ ऋग्यजुःसामभ्यो नमः॥ मु
खे। प्राणशक्त्यै नमः। हृदये। आं नमः गुह्ये। क्रौं नमः पादयोरिति। ऋ
ष्यादिः॥ कं खं गं घं ङं॰ आकाशवायुवह्निजलपृथिव्यात्मने हृदयाय 
नमः॥१॥ चं छं जं झं ञं॥ शब्दस्पर्शरूपरसगंधात्मने शिरसे स्वाहा। २ टं 
ठं डं ढं णं श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणात्मने शिखायै वषट्॥३॥ तं थं दं
धं नं वाक्पाणिपादपायूपस्थात्मने कवचाय हुं॥४॥ पं फं बं भं मं वक्त
व्यादानगमनविसर्गानंदात्मने नेत्रत्रयाय वौषट्॥५॥ यं रं लं वं शं षं
सं हं क्षं मनोबुद्ध्यहंकारचित्तात्मने अस्त्राय फडिति छोटिकात्रयं कृ

त्वा ध्यायेत्॥ रक्तांभोधिस्थपोतोल्लसदरुणसरोजाधिरूढा कराब्जैः
पाशं कोदंडमिक्षूद्भवमथ गुणमप्यंकुशं पंचबाणान्॥ बिभ्राणा
सृक्कपालं त्रिनयनलसिता पीनवक्षोरुहाढ्या देवी बालार्कवर्णा भवतु
शुभकरी प्राणशक्तिः परा नः इति॥ ध्यात्वा मनसा संपूज्य हृदये करं नि
धाय॥ ॐ आं ह्रीं क्रौं यं रं लं वं शं षं सं हं ॐ क्षं सं हंसः ह्रीं ॐ हंसः मम प्राण
इह प्राणाः ॐ आं ह्रीं क्रौं मित्याद्युच्चार्य मम जीव इह स्थितः॥ ॐ आं ह्रीं॰
मम सर्वेंद्रियाणि। ॐ आं ह्रीं॰ वाङ्मनस्त्वक्चक्षुःश्रोत्रजिह्वाघ्राण
पाणिपादपायूपस्थ इहागत्य सुखं चिरं तिष्ठंतु स्वाहा। ॐ क्षं सं हंसः।
ह्रीं ॐ अष्टत्रिंशाधिकशताक्षरोयं प्राणप्रतिष्ठामंत्रः त्रिवारं जपि
त्वा षोडश प्रणवां जपेत्॥ केचित्तु प्रणवाद्योयमो मामित्यादि वदंति त
त्र मूलं चिंत्यं॥ ॥अथ मातृकान्यासः॥ ॥तत्रादौ प्राणायामः॥ अं आं

Indira Gandhi National
Centre for the Arts

॥राम॥ इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः इति षोडशस्वरान् सबिंदूननुस्वार
॥४४॥ यन्वामनासया वायुमापूर्य कादिमांतैर्बिंदुयुतैः कुंभकं कृत्वा यादि
क्षांतैः सबिंदुकैर्दक्षिणनासया रेचयेत्॥ ततोस्य मातृकान्यासस्य
ब्रह्मा ऋषिः। गायत्री छंदः सरस्वती देवता। हलो बीजानि। स्वराः श
क्तयः। शरीरशुध्यर्थं न्यासे विनियोगः॥ ब्रह्मणे नमः शिरसि। गाय
त्र्यै नमो मुखे। सरस्वत्यै नमो हृदये॥ हल्भ्यो नमः गुह्ये। स्वरेभ्यो न
मः पादयोः। अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः॥ इं चं छं जं झं ञं ईं तर्ज ॥राम॥
नीभ्यां २ उं टं ठं डं ढं णं ऊं मध्यमाभ्यां ३ एं तं थं दं धं नं ऐं अनामिका ॥४४॥
भ्यां ४ ओं पं फं बं भं मं औं कनिष्ठिकाभ्यां ५ अं यं रं लं वं शं षं सं हं क्षं अः क
रतलकरपृष्ठाभ्यां नमः ६ एवं हृदयादि॥ अथ ध्यानं॥ अक्षस्रक्पुं

केसारंगविद्याहस्तां त्रिलोचनां॥ चंद्रमौलिं कुचानम्रां रक्ताब्जस्थां
गिरं भजे॥ इति ध्यात्वा। मनसा संपूज्य मातृकामंत्रं त्रिर्जपित्वा देवं
स्नानशालायां निधाय तदग्रे चंदनेन षट्कोणमंडलत्रयं उदक्संस्थ
मालिख्याभ्यर्च्य शंखं प्रणवेनाद्भिः पूरयित्वा दक्षिणमंडले संस्था
प्याभ्यर्च्य प्रार्थयेत्। त्वं पुरा सागरोत्पन्नो विष्णुना विधृतः करे॥ नि
र्मितः सर्वदेवैश्च पांचजन्य नमोस्तु ते॥ पृथिव्यां यानि तीर्थानि स्था
वराणि चराणि च॥ तानि तीर्थानि शंखेस्मिन्विशंतु ब्रह्मशासनात्॥ इ
त्युक्त्वा शंखमुद्रां प्रदर्श्य मध्यमंडले महार्घ्यं गायत्र्याद्भिः पूरयित्वा
पूजयेत्॥ उत्तरमंडले ताम्रकलशं स्थाप्य संपूज्य कलशस्य तिमंत्रै
स्तीर्थान्यावाह्य शंखोदकेनाप्लसहितं पूजासमारंभं प्रोक्ष्य पुरुष
सूक्तेन न्यासं कुर्यात्॥ सहस्रशीर्षेति नारायणः पुरुषोनुष्टुप् अंत्या

Indira Gandhi National
Centre for the Arts

आचारार्क॰

॥राम॥ ॥४५॥

त्रिष्टुप्॥ स्वांगन्यासे वि॰ ॐ सहस्रशीर्षा॰ १ वामकरे। ॐ पुरुष एवेदं॰ दक्षि
णकरे। २ ॐ एतावानस्य॰ वामपादे ३ ॐ त्रिपादूर्ध्व॰ दक्षिणपादे ४ तस्मा ॐ
द्विराळ॰ वामजानौ ५ ॐ यत्पुरुषेण॰ दक्षिणजानौ ६ ॐ तं यज्ञं॰ वामकट्यां ७
ॐ तस्माद्यज्ञात्॰ दक्षिणकट्यां ८ ॐ तस्मा॰ ऋचः॰ नाभौ ९ ॐ तस्माद॰
हृदये १० ॐ यत्पुरुषं॰ कंठे ११ ॐ ब्राह्मणो॰ वामभुजे १२ ॐ चंद्रमा मनसो॰ द
क्षिणभुजे। १३ ॐ नाभ्या॰ मुखे १४ ॐ सप्तास्या॰ भ्रुवोर्मध्ये १५ ॐ यज्ञेन ॥राम॥
मूर्ध्नि १६॥ ॥अथ पंचांगन्यासः॥ ॥ॐ ब्राह्मणोस्येति हृदयोः चंद्रमा ॥४५॥
मनस इति शिरसि। २ नाभ्या आसीदिति शिखायां ३ सप्तास्यासन्निति
कवचाय हुं ४ यज्ञेनेत्यस्त्राय फट्॥ ५॥ एवमेव देवांगन्यासं कृत्वा षोडशो
पचारैः पूजयेत॥ ॐ सहस्रशीर्षा॰ श्रीसूर्यगणेशमहालक्ष्मीशिववि
ष्णुभ्यो नमः। पुष्पस॰। ॐ पुरुष एवेदं॰ आसनं॰ २ ओं एतावान॰ पाद्यं ३ ॐ

पाद्येत्त॰ ॥ समंत्रेणैवाचमनं॥ ॐ त्रिपादूर्ध्व॰ अर्घ्यं॰ ४ ॐ तस्माद्वि॰ आ
चमनं ५। यत्पुरुषेण स्नानं ६ सति संभवे पंचामृतस्नानान्यप्यत्रैव का
रयित्वा सूक्तेनाभिषेकः कार्य इति संप्रदायः। आचमनं। ॐ तं यज्ञं॰ वस्त्रं ७
आचमनं। ॐ तस्मा॰ यज्ञोपवीतं। ७ आचमनं ॐ तस्मा॰ ऋचः॰ गंधं ॐ
तस्मादश्वा॰ पुष्पं १० ॐ यत्पुरुषं॰ धूपं ११ ॐ ब्राह्मणोस्य॰ दीपं १२ ॐ
चंद्रमा॰ नैवेद्यं १३ आच॰ करोद्वर्तनादि। ॐ नाभ्या आसी॰ नमस्कारं १४
ॐ सप्तास्यासन्॰ प्रदक्षिणा। १५ यज्ञेन॰ पुष्पांजलिं १६ ततः श्लिष्टमंत्रे
णैव नीराजनं च कृत्वा। अग्निमावाह्य पुरुषसूक्तेन प्रत्यृचमाज्यं हुत्वा
पुनस्तेनैव सूक्तेन षोडश पुष्पाण्यर्पयित्वा सूक्तं जपेत॥ तदनंतरं
स्वोपदिष्टं मूलमंत्रं यथाशक्ति जपित्वा कर्मेश्वरार्पणं कृत्वा घंटां संपू
ज्य देवं प्रार्थयेत॥ तत्र मंत्राः॥ ॥मंत्रहीनं क्रियाहीनं भक्तिहीनं सुरेश्वर॥

Indira Gandhi National
Centre for the Arts

यत्पूजितं मयादेव परिपूर्णं तदस्तु मे॥ आवाहनं न जानामि न जानामि वि
सर्जनं॥ पूजां चैव न जानामि क्षम्यतां परमेश्वर॥ अन्यथा शरणं नास्ति
त्वमेव शरणं मम॥ तस्मात्कारुण्यभावेन रक्ष रक्ष परमेश्वर॥ भूमौ
स्खलितपादानां भूमिरेवावलंबनं॥ त्वयि जातापराधानां त्वमेव श
रणं ममेति प्रार्थ्य। शंखमध्ये स्थितं तोयं भ्रामितं केशवोपरि। अंगल
ग्नं मनुष्याणां ब्रह्महत्यां व्यपोहतु इति देवोपरि भ्रामयित्वा जलं शिर
स्युरसि चाभ्युक्ष्य॥ अकालमृत्युहरणं सर्वव्याधिविनाशनं॥ रोगघ्नं
पुण्यदं पापक्षयसुरपादोदकं जनामिति मंत्रेण देवतीर्थं पिबेदिति संक्षेपः॥
॥ ॥इति श्रीभरद्वाजमहादेवभट्टात्मज दिवाकरकृते आचारार्के ऽष्टधावि
भक्तस्य दिवसस्य प्रथमभागकृत्यं॥ ॥ सनातनं चिन्मयमादिबीजं
संसारवृक्षस्य निरामगम्यं॥ रामाभिधं ज्योतिरहर्निशं तद्धृदंबुजे



ऽस्फुरतान्मदीये॥ ॥अथ द्वितीयभागकृत्यं॥ ॥मदनरत्ने दक्षः॥ दिवस
स्याद्यभागे तु सर्वमेतत्समाचरेत्॥ द्वितीये च तथाभागे वेदाभ्यासो वि
धीयते॥ वेदाभ्यासोपि पंचधेत्युक्तमाचारमयूखे षड्विंशन्मते॥ वे
दस्वीकरणं पूर्वं विचारोभ्यसनं जपः॥ तद्दानं चैव शिष्येभ्यो वेदाभ्या
सो हि पंचधेति॥ कौर्मे॥ जपेदध्यापयेच्छिष्यान्धारयेद्वा विचारयेत्॥
अवेक्षेत च शास्त्राणि धर्मादीनि द्विजोत्तम इति॥ द्वितीयभागकृत्यं॥
॥ ॥अथ तृतीयभागकृत्यमाह दक्षः॥ तृतीये च तथा भागे पोष्यव
र्गार्थसाधनं॥ पोष्यवर्ग उदाहृतः॥ ज्ञातिर्बंधुजनः क्षीणः स्तथाना
थः समाश्रितश्च इति। तृतीयभागकृत्यं॥ ॥अथ चतुर्थभागकृत्यं॥
दक्षस्मृतौ॥ चतुर्थे तु दिवाभागे स्नानार्थं मृदमाहरेत्॥ तिलपुष्प
कुशादीश्च स्नायाच्चाकृत्रिमे जले॥ ॥गृह्यपरिशिष्टे॥ ॥अथम

Indira Gandhi National
Centre for the Arts

॥राम॥ ध्यंदिने तीर्थमेत्य स्नायान्नास्मिन्नाकृत्रलयस्तु तर्पणाद्वस्त्रं निष्पीड
॥४७॥ येदिति। तच्च प्रतिपत् षष्ठ्येकाऽदशी रविभौमभृगुवारभरणीकृत्तिका
मघानक्षत्रमन्वादियुगादिभिन्नतिथौ कार्यं। तत्र निषेधात्॥ निषेधवा
क्यानि तु मदनरत्नादिग्रंथेषु द्रष्टव्यानि॥ ॥अथ मध्याह्न स्नानप्रयो
गः॥ ॥नदीतीरमेत्य प्रक्षालितमुखपादपाणिराचांतो बद्धशिखः शुचौ
देशे शुद्धमृत्तिकां तंदुलयवतिलांश्च निधाय मलस्नानं विधाय देश
कालौ स्मृत्वा मम समस्त पापक्षयायुरभिवृद्धिद्वारा श्रीपरमे॰ मध्या राम
ह्न स्नानं करिष्ये इति संकल्प्य। मृत्तिकां गायत्र्यादाय॥ अश्वक्रांते रथ ॥४७॥
क्रांते विष्णुक्रांते वसुंधरे॥ शिरसा धारयिष्यामि रक्षस्व मां पदे पदे॥ उ
द्धृतासि वराहेण कृष्णेन शतबाहुना॥ मृत्तिके हन मे पापं यन्मया दुष्कृ
तं कृतमित्यभिमंत्र्य गायत्र्या प्रोक्ष्य। गायत्रीशिरःसंयुक्तेन ॐ मापो

ज्योतीरसोमृतं ब्रह्म भूर्भुवः स्वरोमिति मंत्रेणावृत्य त्रेधा विभज्यैके
न भागेन मूर्धादिनाभिपर्यंतं द्वितीयभागेन नाभेरधः पादपर्यंतम
नुलिप्य लुप्तांगानि क्षालयित्वा ऽदित्यं निरीक्ष्य द्विराचम्य तृतीयभा
गं प्रचोदयादित्यस्त्रेण दत्वा सव्ये पाणौ कृत्वा ॐ भूरिति दक्षिणभा ॐ
गं। ॐ भुव इति मध्यमभागं॥ स्वरित्युत्तरभागं विधाय दक्षिणभाग
मस्त्रेण दशदिक्षु मंत्रावृत्त्या निक्षिप्योत्तरभागं तीर्थे तु क्षिप्त्वा
मध्यमभागं गायत्र्याभिमंत्र्यादित्याय प्रदर्श्य गायत्र्या प्रणवेन च सर्वां
गमनुलिप्य॥ सुमित्रा न आप ओषधयः संतु इति मंत्रेण शिरात्मानं
परिषिच्य दुर्मित्रास्तस्मै भूयासुर्यो स्मान् द्वेष्टि यं च वयं द्विष्म इति मं
त्रेणांगानि प्रक्षाल्याचम्य प्रातःस्नानवद्वरुणावाहनादि वस्त्रनिष्पी
डनवर्ज्यं सर्वं कुर्यात्॥ अशक्तौ तु प्रातर्वत्स्नायात्॥ ॥अथात्रैवा

Indira Gandhi National
Centre for the Arts

॥राम॥ ॥४८॥

शक्तस्य मंत्रस्नानविधिर्लिख्यते॥ ॥श्राद्धहेमाद्रौ योगयाज्ञवल्क्यः॥
असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया॥ मंत्रस्नानादितः सप्त
केचिदिच्छंति सूरयः॥ मांत्रं भौमं तथाग्नेयं वायव्यं दिव्यमेव च॥ वारु गे
णं मानसं चैव सप्त स्नानान्यनुक्रमात्॥ एतेषां लक्षणान्याह स ए
व॥ आपोहिष्ठादिभिर्मंत्रं मदाक्तं भस्म पार्थिवं॥ आग्नेयं भस्मना स्ना
नं वायव्यं गोरजः स्मृतं॥ यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते॥ वा
रुणं चावगाहं तु मानसं विष्णुचिंतनमिति॥ जाबालः॥ अशिरस्कं भ
वेत्स्नानं स्नानाशक्तौ तु कर्मिणां॥ आर्द्रेण वाससा वापि मार्जनं दैहि ॥राम॥
कं विदुः॥ उशनाः॥ ज्वराभिभूता या नारी रजसा तु परिप्लुता॥ कथं ॥४८॥
तस्या भवेच्छौचं शुद्धिः स्यात्केन कर्मणा॥ चतुर्थेहनि संप्राप्ते स्पृशेद
न्या तु तां स्त्रियं॥ सा सचैलावगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत्॥

दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः॥ अंते च वाससां त्यागस्ततः शु
द्धा भवेत्तु सेति गृह्यपरिशिष्टे॥ ॥अथाशक्तस्य मंत्रस्थे स्नानं शुचौ
देशे शुचिरासीनः प्राणानायम्य दर्भपाणिः सव्ये पाणावपः कृत्वा
तिसृभिरापोहिष्ठीयाभिः पच्छः प्रणवपूर्वं दर्भोदकैर्मार्जयेत्॥ पाद
योर्मूर्ध्नि हृदये मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथार्धर्चे
शो मूर्ध्नि हृदये पादयोर्हृदये पादयोर्मूर्ध्नि चाथर्चो हृदये पादयो
र्मूर्ध्नि चाथ तृचेन मूर्ध्नीति मार्जयित्वा गायत्र्या दशधाभिमंत्रिता आ
पः प्रणवेन पीत्वा द्विराचमेदित्येतन्मंत्रस्नानं॥ ॥एवं मध्याह्नस्ना
नं विधाय मध्याह्नसंध्या कार्या। ततो ब्रह्म यज्ञः॥ तथा च पर
शुराम निबंधे॥ अत्रिः॥ स्नानं मध्याह्निकं कृत्वा संध्याकर्म निवर्त्य च॥
ब्रह्मयज्ञं विधायाथ गृहमेत्याचरेत्स्मरानिति॥ शंखः॥ प्रातः सं

Indira Gandhi National Centre for the Arts

॥राम॥ ध्यां सनक्षत्रां मध्यमां स्नानकर्मणि॥ सादित्यां पश्चिमां संध्यामुपासी
॥४९॥ सतयथाविधीति॥ स्नानकर्मणि कृते सतीति विशेषः॥ अत्र केचित् बह्वृ
चानामादौ तर्पणम् ततः संध्या तन्मते ग्रामाग्निष्टुम्यापआप्लुत्यभू
चोदेनोसत्तोपवीत्यादिना तर्पण तस्य स्नानानंतर्यौक्ते रित्याकुस्तच्चिं
त्यं॥ अपआप्लुत्येति क्त्वा प्रत्यय स्योत्तरकालमात्रार्थत्वेप्यव्यवहितोत्त
रकालार्थत्वाभावेनात्रैवचनोक्तक्रमबाधे प्रमाणाभावात्॥ तथाच॥ सं ध्ये
ध्याहीनो शुचिर्नित्यमनर्हः सर्वकर्मसु॥ यदन्यत्कुरुते कर्म न तस्य फल ॥राम॥
भाग्भवेदिति॥ दक्षवाक्यात् संध्यैवादौ युक्ता॥ एष एव मातामहचरणा ॥४९॥
नां वाजपेययाजिनां प्रयोगपारिजातकारादि पूर्वनिबंधकाराणां स्ना
नोत्तरसंध्याप्रयोगं वदतामाशयः॥ ॥अथ मध्याह्नसंध्यायां विशे
षः॥ भगवान्॥ आपः पुनंतु मध्याह्ने मंत्राचमनमाचरेत्॥ गृह्यपरिशि

ष्टे॥ आकृष्णीययाहंसवत्या वात्रिः सकृद्वार्घ्यमुत्क्षिपेदिति॥ अर्घ्य
दाने विशेषः संग्रहे॥ मुक्तहस्तेन दातव्यं मुद्रांतत्र न कारयेत्॥ तर्ज
न्यंगुष्ठयोगे न राक्षसी मुद्रिका मता॥ राक्षसी मुद्रिकार्घेण तत्तो
यं रुधिरं भवेत्॥ जलेष्वर्घ्यं प्रदातव्यं जलाभावे शुचिस्थले॥ सं
प्रोक्ष्य वारिणा सम्यक् ततोर्घ्यं तु प्रदापयेदिति॥ उपस्थाने विशेषो
गृह्यपरिशिष्टे॥ उद्वयं उदुत्यं जातवेदसं चित्रं देवानामिति सूक्ता
भ्यामादित्यमुपस्थाय जपमासीनो यथेष्टकालं कुर्यादित्येष
संध्याविधिर्व्याख्यात इति॥ गायत्रीजपस्तूपविश्यैव कार्यः परि
शिष्टात्॥ तथा मध्यमसंध्यायामासीनः प्राङ्मुखो जपेदिति स्मृ
तिचंद्रिकायां पुराणोक्तेश्च॥ संध्यालोपे प्रायश्चित्तं स्मृत्यंतरे॥
यः संध्यां यद्दिनोपास्ति अग्निकार्यं न चेत्कृतं॥ गायत्र्यष्टशतं ज

Indira Gandhi National Centre for the Arts

प्यं प्रायश्चित्तं द्विजन्मनामिति॥ ॥अथ प्रयोगः॥ ॥आचम्य प्राणा
नायम्य ममोपात्त· मध्याह्न संध्यामुपासिष्ये। इति संकल्प्यापो हिष्ठे
तित्र्येन पूर्ववत्प्रथममार्जनं कृत्वा मंत्राचमनं कार्यं॥ आपः पुनंति
त्यस्यानुवाकस्य नारायण आपो ऋषिः॥ मंत्राचमने विनियोगः॥ ॐ
आपः पुनंतु पृथिवीं पृथिवी पूता पुनातु मां॥ पुनंतु ब्रह्मणस्पति र्ब्र
ह्म पूता पुनातु मां॥ यदुच्छिष्टमभोज्यं यद्वा दुश्चरितं मम॥ सर्वं पुनं
तु मामापोसतां च प्रतिग्रहं स्वाहेति मंत्रेणापः पीत्वाचम्य प्रातः संध्या
वद्द्वितीय तृतीय चतुर्थ मार्जनाघमर्षणां तं कृत्वा आचम्यार्घ्यं द
द्यात्॥ हंसः शुचिषदिति मंत्रस्य गोतमो वामदेवः ऋ सूर्यो जगती॥
अर्घ्यदाने वि·॥ ॐ हंसः शुचिषदिति मंत्रस्य गोतमो वामदेवः ऋ
सूर्यो जगती॥ अर्घ्य दाने वि॥ हंसः शुचिष० ऋतं॥ श्री सूर्यायेद
ॐ



मर्घ्यं न मम॥ एवं त्रिः सकृद्वार्घ्यं दत्वात्मानं परिषिंच्य द्विरा चम्योर्ध्व
बाहुरूर्ध्वमुखः सूर्यमुपतिष्ठेत्॥ उदुत्यमिति त्रयोदशर्चस्य सूक्तस्य
कण्वः प्रस्कण्व ऋषिः। सूर्यो देवता॥ नववाद्या गायत्र्यः अंत्याश्चतस्रो
नुष्टुभः चित्रं देवानामिति षड्चस्य सूक्तस्य आंगिरसः कुत्सः सू
र्यस्त्रिष्टुप्। सूर्योपस्थाने०॥ ॐ उदुत्यं जातवेदसं० चित्रं देवानामुद
गा· तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ इत्यु
पस्थायोपविश्याचम्य प्राणानायम्य भूतशुध्यादि कृत्वा। युवतीं
युवादित्यमंडलमध्यस्थां श्वेतवर्णां श्वेतांबरानुलेपनां स्रगाभर
णां पंचवक्त्रां प्रतिवक्त्रं त्रिनेत्रां चंद्रशेखरां त्रिशूलखड्ग खट्वांगड
मरुकं चतुर्भुजां वृषभासनारूढां रुद्रदैवत्यां यजुर्वेदमुदाहरंतीं भु
वर्लोकाधिष्ठात्रीं सावित्री नामदेवतां ध्यात्वा संपूज्य यथेष्ट कालं ज

Indira Gandhi National
Centre for the Arts

राम॥ [रं]कुर्यात्॥ ॥अथ पंचमहायज्ञाः॥ ॥तथाश्वलायनसूत्रं॥ ॥अ
५१॥ थातः पंच यज्ञा देवयज्ञो भूतयज्ञः पितृयज्ञो ब्रह्मयज्ञो मनुष्ययज्ञ
इति। तद्यदग्नौ जुहोति स देवयज्ञो यद्बलिं करोति स भूतयज्ञो यत्पि
तृभ्यो ददाति स पितृयज्ञो यत्स्वाध्यायमधीते स ब्रह्मयज्ञो यन्मनु
ष्येभ्यो ददाति स मनुष्ययज्ञ इति तानेतान्यज्ञानहरहः कुर्वीतेति॥
॥ ॥यद्यपि पाठक्रमाद्वैश्वदेवानंतर्यं ब्रह्मयज्ञस्य प्राप्तं तथाप्यादौ ॥ राम॥
ब्रह्मयज्ञ एव कार्यः॥ स्वगृह्यविधिना कृत्वा ब्रह्मयज्ञं पुरा द्विजः॥ ॥५१॥
स्वाध्या[illegible]तर्पणाभ्यां[illegible] गृहमेत्याचरेत्परा नित्याश्वलायनस्मृता
वुक्तेः॥ वृत्तौ तु वैश्वदेवस्य पुरस्तादुपरिष्टाद्वा ब्रह्मयज्ञः कार्यो न
क्रमनियम इत्युक्तं॥ श्रीमातामहचरणास्तु। सर्वार्वाकृतर्पणात्का
र्यः पश्चाद्वा प्रातराहुतेः॥ वैश्वदेवावसाने वा नान्यत्र [illegible]निमित्तत
त्रा

[illegible]तिवाक्यमाश्वलायनात्परं॥ आश्वलायनानां तर्पणस्या
[illegible]त्रात्प्राप्ते र्वाकृतर्पणादित्यस्य तदितरान्प्रत्येव
[illegible]र्यात्॥ त[illegible]र्तृपश्चाद्वेति वैश्वदेवावसाने वेत्येतदपि ता
न्प्रत्येव स्यात्[illegible]म्भ्य इत्याश्वलायनैस्त्वादावेव ब्रह्म
यज्ञः कार्य इत्याहुः॥ त्रि[illegible]मेव॥ ॥अथ स्वाध्यायविधिः प्राग्
ग्वोदग्वा ग्रामान्निष्क्रम्याप उप[illegible]ो देशे यज्ञोपवीत्याचम्याक्लि
न्नवासा दर्भाणां महदुपस्तीर्य प्राक्कू[illegible]नां तेषु प्राङ्मुख उपविश्योप
स्थं कृत्वा दक्षिणोत्तरौ पाणी संधाय पवित्रवंतौ विज्ञायते पावा एष
ओषधीनां रसो यद्दर्भाः सरसमेव तद्ब्रह्म करोति द्यावापृथिव्योः संधि
मीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं मन्येत तथा युक्तोऽधीयीत
स्वाध्यायमोंपूर्वा व्याहृतयः सा सावित्रीमन्वाह पच्छोऽर्धर्चशः सर्वा

Indira Gandhi National Centre for the Arts

भितितृतीयं॥ ॥अथस्वाध्यायमधीयीतऋचोयजूंषिसामान्यथ
॥राम॥ र्वांगिरसोब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानी
॥५२॥ तिविज्ञायतेयदृचोधीतेपयआहुतिभिरेवतद्देवतास्तर्पयतियद्यजूं
षिघृताहुतिभिर्यत्सामानिमध्वाहुतिभिर्यदथर्वांगिरसःसोमाहु
तिभिर्यद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणानीत्य
मृताहुतिभिर्यदृचोधीतेपयसःकुल्याअस्यपितॄन्स्वधाउपक्षरंति
यद्यजूंषिघृतस्यकुल्यायत्सामानिमध्वःकुल्यायदथर्वांगिरसःसो
मस्यकुल्यायद्ब्राह्मणानिकल्पान्गाथानाराशंसीरितिहासपुराणा ॥राम॥
नीत्यमृतस्यकुल्याःसयावन्मन्येततावदधीत्यैतयापरिदधातिनमो ॥५२॥
ब्रह्मणेनमोअस्त्वग्नयेनमःपृथिव्यैनमओषधीभ्यः॥नमोवाचेन
मोवाचस्पतयेनमोविष्णवेमहतेकरोमीति॥ ॥ब्रह्मयज्ञप्रयो

गेथातोधर्मंव्याख्यास्यामइत्यादिवाक्यानिशिष्टाःपठंतितत्रमूलं
नजाने॥ ॥देवतास्तर्पयतिप्रजापतिर्ब्रह्मावेदादेवाऋषयःसर्वाणि
छंदांस्योंकारोवषट्कारोव्याहृतयःसावित्रीयज्ञाद्यावापृथिवीअं
तरिक्षमहोरात्राणिसंख्याःसिद्धाःसमुद्रानद्योगिरयःक्षेत्रौषधिव
नस्पतिगंधर्वाप्सरसोनागावयांसिगावःसाध्याविप्रायक्षारक्षां
सिभूतान्येवमंतान्यथऋषयःशतर्चिनोमाध्यमागृत्समदोविश्वा
मित्रोवामदेवोत्रिर्भरद्वाजोवसिष्ठःप्रगाथाःपावमान्यःक्षुद्र
सूक्तामहासूक्ताइतिप्राचीनावीतीसुमंतुजैमिनिवैशंपायनपै
लसूत्रभाष्यभारतधर्माचार्याजानंतिबाहविगार्ग्यगौतमशाकल्य
बाभ्रव्यमांडव्यमांडूकेयागार्गीवाचक्नवीवडवाप्रातीतेयीसुलभा

Indira Gandhi National
Centre for the Arts

मैत्रेयीकहोलं कौषीतकं महाकौषीतकं पैग्यं महापैग्यं सुयज्ञं सांख्याय
नं ऐतरेयं महैतरेयं शाकलं बाष्कलं सुजातवक्त्रं औदवाहिं महौदवाहिं
सौजामिं शौनकमाश्वलायनं ये चान्ये आचार्यास्ते सर्वे तृप्यंत्विति प्र
तिपुरुषं पितृंस्तर्पयित्वा गृहानेत्य यद्ददाति सा दक्षिणा अपि वि
ज्ञायते स य दि तिष्ठन्व्रजन्नासीनः शयानो वा यं यं क्रतुमधीते तेन ते
न हास्य क्रतुनेष्टं भवतीति विज्ञायते तस्य द्वावनध्यायौ यदाऽऽत्माऽशुचिर्य॥राम॥
द्देशः॥ ॥अथ पित्रादितर्पणे क्रमस्तु हेमाद्रौ संग्रहे॥ तातांबात्रितयं ॥५३॥
सपत्नजननीमातामहादित्रयं सस्त्री स्त्रीतनयादि तातजननी स्वभ्रा
तरः सस्त्रियः॥ तातांबात्मभगिन्यपत्यधवयुक् जायापिता सद्गुरुः शि
ष्याप्ताः पितरो महालयविधौ तीर्थे तथा तर्पणे॥ ॥अस्यार्थः॥ जन
कादे त्रयं। जनन्यादित्रितयं। सापत्नमाता॰ मातामहादित्रयं। सस्त्री

सपत्नीकं। स्त्री॥ स्वस्त्री। तनयादि। पुत्रकन्याः। तातजननीस्वभ्रात
रः॥ पितृव्यमातुलसोदराः सपत्नीकाः॥ तातांबात्मभगिनी। पितृमा
तृस्वभगिनी सापत्या सधवा च॥ जायापिता श्वशुरः। शेषं सुगमं॥
तर्पणप्रकारमाह वसिष्ठः॥ संबंधमनुकीर्त्यैव नामगोत्रमनंतरं॥
वस्वादिरूपं संकीर्त्य स्वधाकारेण तर्पयेदिति॥ नामग्रहणे विशेषो
हेमाद्रौ॥ शर्मांतं ब्राह्मणस्योक्तं वर्मांतं क्षत्रियस्य तु॥ गुप्तांतं चै
व वैश्यस्य दासांतं शूद्रजन्मनः इति॥ स्त्रीणां दांतं नामनिर्देश इति
गोभिलसूत्रं॥ व्यासः॥ एकैकमंजलिं देवा द्वौ द्वौ तु सनकादयः॥
अर्हंति पितरस्त्रीन् स्त्रियस्त्वेकैकमंजलिं॥ कासुचित्स्त्रीषु वि
शेषो हेमाद्रौ॥ मातृमुख्यासु यास्तिस्रस्तासां स्त्री स्त्री जलांजली
न्॥ सपत्न्याचार्यपत्नीनां द्वौ द्वौ दद्याज्जलांजलीनिति। ब्रह्मयज्ञादौ

Indira Gandhi National
Centre for the Arts

॥राम॥ ॥५४॥ ऋष्यादिस्मरणं नकुर्यादित्याह भगवान्। नचस्मरेदृषिछंदः श्राद्धे
वैतानिकेमखे॥ ब्रह्मयज्ञे चवैतद्वत्तथोंकारंतुवर्जयेदिति॥ कारिका
यां॥ दर्भान्बहूनथुचोदेशे प्रागग्रा नास्तृणात्यथ॥ दर्भेषूपविशे
त्कर्मण्यत्र प्राङ्मुखएवसन्॥ कृत्वोपस्थंकरेसव्ये उत्ताने प्रागंगु
लौ॥ पवित्रेस्थापयेदुक्ते प्रागग्रे दक्षिणेनतु॥ न्यंचंप्रागंगुलं
तेनसंदध्याद्दक्षिणंकरं॥ ॐपूर्वाव्याहृतीस्तिस्रः समग्राश्चसकृ
द्वदेत॥ पच्छस्त्वर्धर्चशः सर्वांसावित्रीं त्रिर्वदेदथ॥ ॥ऋग्विधा ॥राम॥
ने॥ अग्निमीळेजपेत्सूक्तंपापघ्नंश्रीकरंपरं॥ पारायणफलंतस्य ॥५४॥
वेदानांस्यात्सहस्रशइति॥ ॥अथब्रह्मयज्ञप्रयोगः॥ वेदपुरुषा
यनमइतिप्रदक्षिणीकृत्यासनेउपविश्यद्विराचम्यप्राणानाय
म्यममोपात्त॰ र्थंब्रह्मयज्ञेनयक्ष्ये॥ विद्युदसिविद्यमेपाप्मानमृता

२ त्सत्यमुपैमीतिमंत्रेणापउपस्पृश्यवामजानूपरिदक्षिणपादंनि
धायस्वस्वसंकोचेवामपादोपरिदक्षिणांगुष्ठेनिधायदक्षिणजा
नुनिकुशपवित्रद्वयगर्भं॰ प्रागंगुलिमुत्तानंसव्यपाणिंनिधायत
दुपरिदक्षिणपाणिंप्रागंगुलिमेवन्यंचंनिधायव्याहृतिपूर्वांपच्छो
ऽर्धर्चशः सर्वांसावित्रीं पठित्वा। अग्निमीळेपुरोहितं॰ सचस्वानःस्वस्त
ये॥ अग्निर्वैदेवानामवमोविष्णुःपरमः॥ अथमहाव्रतं॰ एषपंथाएतत्क
र्म२ अथातःसंहिताया उपनिषत्॥३ विदामघवन्विदा॥४ महाव्रतस्य
पंचविंशतिंसामिधेन्यः॥ इषेत्वोर्जेत्वा। अग्नआयाहिवीतये। शंनोदे
वीरभिष्टये॥ अथैतस्यसमाम्नायस्य। समाम्नायःसमाम्नातः॥
मयरसतजभनलगसंमितं॥ गौः। ग्मा। पंचसंवत्सरमयं॥ अथशि
क्षांप्रवक्ष्यामि॥ अथादिराधदेशः। यदिंद्रोदाशराज्ञेमानुषंव्यगाह

Indira Gandhi National
Centre for the Arts

॥राम॥ थाः॥इदं ज्ञनाउपश्रुतं॥योगीश्वरं याज्ञवल्क्यं।नारायणं नमस्कृत्य।
॥५५॥ अथातो धर्मं व्याख्यास्यामः॥अथातो धर्मजिज्ञासा।अथातो ब्रह्मजि
ज्ञासेति पठित्वा।तच्छंयोरावृणीमहइत्युक्त्वा।नमो ब्रह्मणइतित्रिरु
च्चार्य।।दृषिरसि दृश्व मे पाप्मानमृतात्सत्यमुपैपागामित्यपः स्पृष्ट्वा
सव्यान्वारब्धेन दक्षिणहस्तेन तर्पयेत्॥ ॥उक्तं च मदनपारिजा
ते संग्रहे॥अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु॥सव्योत्तरा
भ्यां पाणिभ्यामथवा तर्पणं भवेत्॥अत्र पूर्वार्धमाश्वलायनपरं॥ राम
उत्तरार्धं त्वापस्तंबादिपरमिति व्यवस्था॥श्रीमातामहगुरुचरणा ॥५५॥
स्तु व्यवस्थामूलं चिंत्यमित्याहुः॥अत्र व्यवस्थामूलं त्वाश्वलाय
नसूत्रमेवाभाति॥तच्च श्रौतसूत्र प्रथमाध्याये अनादेशे इति भनां
देशे अंगानुक्तौ दक्षिणांगं सर्वत्र प्रतीयादित्यर्थः।तथा च प्रा

---

प्त दक्षिणांगानुवादेन सव्यान्वारंभमात्रमत्र विधीयतइति॥अथ प्रा
जापत्याद्यैर्मंत्रैर्यथावचनं तृप्यतु तृप्यतां तृप्यंतु इत्यंतैस्तर्पयेत्॥अ
त्र द्यावापृथिवी तृप्यतामिति लोटः प्रथमपुरुषद्विवचनं प्रयोक्तव्यं॥
॥ ॥प्रजापतिस्तृप्यतु।१ ब्रह्मा तृप्यतु २ वेदास्तृ०३ देवास्तृ०४ ऋष
यस्तृ०५ सर्वाणि छंदांसि तृ०६ ओंकारस्तृ०७ वषट्कारस्तृ०८ व्या
हृतयस्तृ०९ सावित्री तृ०१० यज्ञास्तृप्यं०११ द्यावापृथिवी तृप्यतां१२
अंतरिक्षं तृ०१३ अहोरात्राणि तृ०१४ संख्यास्तृ०१५ सिद्धास्तृ०१६ समु
द्रास्तृ०१७ नद्यस्तृप्यं०१८ गिरयस्तृ०१९ क्षेत्रौषधिवनस्पतिगंधर्वा
प्सरसस्तृ०२० नागास्तृ०२१ वयांसि तृ०२२ गावस्तृप्यं०२३ साध्यास्तृ०२४
विप्रास्तृ०२५ यक्षास्तृप्यं०२६ रक्षांसि तृ०२७ भूतानि तृ०२८ एवमंता
नि तृप्यंतु २९।इत्येकोनत्रिंशन्मंत्रैः कुशाग्रैर्देवतीर्थेनैकैकवारं तर्पयित्वा

Indira Gandhi National
Centre for the Arts

निवीती। शतर्चिनस्तृप्यं॰१ माध्यमास्तृप्यं॰२ गृत्समदस्त॰३ विश्वा
॥राम॥ मित्रस्त॰४ वामदेवस्त॰५ अत्रिस्त॰ भरद्वाजस्त॰७ वसिष्ठस्त॰८
॥५६॥ प्रगाथास्तृप्यं॰९ पावमान्यस्त॰१० क्षुद्रसूक्तास्त॰११ महासूक्ता
स्तृप्यं॰१२ इति द्वादशमंत्रैः कुशमध्येन ऋषितीर्थेन सकृन्मंत्रे
ण सकृत्तूष्णीं प्रत्येकं तर्पयित्वा। प्राचीनावीती॥ सुमंतुजैमिनि
वैशंपायनपैलसूत्रभाष्यभारतमहाभारतधर्माचार्यास्त॰१ जा
नंतिबाहविगार्ग्यगौतमशाकल्यबाभ्रव्यमांडव्यमांडूकेयास्त॰२
गार्गीवाचक्नवीत॰३ वडवाप्रातीथेयीत॰४ सुलभामैत्रेयीत॰५ ॥राम॥
कहोलंत॰६ कौषीतकं॰७ महाकौषीतकंत॰८ पैंग्यंत॰९ महापैंग्यं ॥५६॥
तर्प॰१० सुयज्ञंत॰११ सांख्यायनंत॰१२ ऐतरेयंत॰१३ महैतरेयंत॰१४
शाकलंतर्प॰१५ बाष्कलंत॰१६ सुजातवक्त्रंत॰१७ औदवाहिंत॰१८

महौदवाहिं॰१९ सौजामिंत॰२० शौनकंतर्प॰२१ आश्वलायनं॰२२
ये चान्ये आचार्यास्ते सर्वे तृप्यंत्विति त्रयोविंशतिभिर्मंत्रैः पितृ
तीर्थेन कुशमूलैः सकृन्मंत्रेणाद्विस्तूष्णीं एवं त्रिवारं तर्पयेत्। पि
तोस्मत्पितरममुकशर्माणममुकगोत्रं वसुरूपं स्वधा नमस्तर्पया
मि। ३ एवं पितामहादींस्तर्पयित्वा॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृ
मानवाः॥ तृप्यंतु पितरः सर्वे मातृमातामहादयः॥ अतीतकुलकोटी
नां सप्तद्वीपनिवासिनां॥ आब्रह्मभुवनाल्लोकानिदमस्तु तिलोदकं॥
इति त्रिर्दत्वा॥ ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः॥ ते गृ
ह्णंतु मया दत्तं वस्त्रनिष्पीडनोदकमिति चतुर्गुणितमुपरि दशांव
स्त्रं स्थले निष्पीड्याचामेत्॥ ॥अथाशौचे सति संध्याप्रकारमाह
जाबालिः॥ अर्घ्यांतां मानसीं संध्यां प्राणायामविवर्जितेति। सरहा

Indira Gandhi National
Centre for the Arts

जः॥सूतके मृतके वापि प्राणायाममंत्रकं॥तथा मार्जनमंत्रांस्तु
मनसोच्चार्य मार्जयेत्॥मार्जनं तु न वा कार्यमुपस्थानं न चैव हि॥गा
यत्रीं दशवारं जपेदित्याहाश्वलायनः॥ ॥आपन्नश्चाशुचिः काले
तिष्ठन्नपि जपेद्दशेति॥आपन्नो आपद्युक्तः॥अशुचि राशौचवान्॥सू
तके विष्ण्वादिपूजापि न कार्या॥तदुक्तं सूतक इत्युपक्रम्य हेमाद्रौ वा
राहे॥ ॥पूर्वसंकल्पितं यत्तु व्रतं सुनियतव्रतैः॥तत्कर्तव्यं नरैः श्राद्धं
दानार्चनविवर्जितमिति॥पंचयज्ञा अपि न कार्याः॥पंचयज्ञविधानं ॥राम॥
तु न कुर्यान्मृत्युजन्मनोरिति निषेधात्॥ ॥प्रसंगाच्छूद्रजातीनामपि ॥५७॥
तत्संतृप्तिकारणं॥तर्पणं प्रवक्ष्याम्यत्र मूलवाक्यानुसारतः॥मदनपा
रिजाते योगयाज्ञवल्क्यः॥तृप्यति समुच्चार्य तर्पतामित्यथापि वा॥
विधितः प्रक्षिपेत्तोयं देवादीनामनो वतः॥देवानाह स एव॥ब्रह्माणं त

र्पयेत्पूर्वं विष्णुं रुद्रं प्रजापतिं॥देवांश्छंदांसि वेदांश्च ऋषींश्चैव सना
तनान्॥आचार्यांश्चैव गंधर्वानाचार्यतनयांस्तथा॥संवत्सरं साव
यवं देवीश्चाप्सरसस्तथा॥तथा देवानुगान्नागान्सागरान्पर्वतानपि॥
सरितोथ मनुष्यांश्च यक्षान्रक्षांसि चैव हि॥पिशाचांश्च सुपर्णांश्च
भूतान्यथ पशूंस्तथा॥वनस्पतीनोषधीश्च भूतग्रामं चतुर्विधं॥
तत्रैव विष्णुसमुच्चये॥ ॥ततः कृत्वा निवीतं तु यज्ञसूत्रमतंद्रितः॥प्रा
जापत्येन तीर्थेन मनुष्यांस्तर्पयेत्पृथक्॥मानुष्यानाह कार्ष्णाजिनिः॥
सनकश्च सनंदश्च तृतीयश्च सनातनः॥कपिलश्चासुरिश्चैव वोढुः
पंचशिखस्तथा॥एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्तिताः॥मरीचि
मत्रिमंगिरसं पुलस्त्यं पुलहं क्रतुं॥प्रचेतसं वसिष्ठं च भृगुं नारदमेव
च॥देवब्रह्मऋषीन्सर्वांस्तर्पयेदक्षतोदकैरिति योगयाज्ञवल्क्यः॥अ

Indira Gandhi National Centre for the Arts

पसव्यंततः कृत्वाभूत्वाचपितृदिङ्मुखः॥ पितॄन्दिव्यानदिव्यांश्चपित
॥राम॥ तीर्थेनतर्पयेत्॥ ब्रह्मातृप्यतां॥ विष्णुस्तृप्यतां २ रुद्रस्तृ० ३ प्रजापति
॥५८॥ स्तृ० देवास्तृ० छंदांसितृ० वेदास्तृ० ऋषयः पुराणाचार्यास्तृ० गंधर्वा
स्तृ० इतराचार्यास्तृ० संवत्सरः सावयवस्तृ० देव्यस्तृ० अप्सरसस्तृ० १४
देवानुगास्तृ० नागास्तृ० सागरास्तृ० पर्वतास्तृ० सरितस्तृ० मनुष्या
स्तृ० यक्षास्तृ० रक्षांसितृ० पिशाचास्तृ० सुपर्णास्तृ० भूतानितृ० प
शवस्तृ० वनस्पतयस्तृ० ओषधयस्तृ० भूतग्रामश्चतुर्विधस्तृ० २९॥
अथऋषयः॥ निवीतीउदगग्रदर्भमध्येन ऋषितीर्थेन द्वाद्वावंजली ॥राम॥
न्दद्यात्॥ सनकस्तृ० १ सनंदनस्तृ० २ सनातनस्तृ० ३ कपिलस्तृ० ४ आ ॥५८॥
सुरिस्तृ० ५ वोढुस्तृ० ६ पंचशिखास्तृ० ७ मरीचिस्तृ० ८ अत्रिस्तृ० ९ अं
गिरास्तृ० १० पुलस्त्यास्तृ० ११ पुलहस्तृ० १२ क्रतुस्तृ० १३ प्रचेतास्तृ० १४ व

सिष्ठस्तृ० १५ भृगुस्तृ० १६ नारदस्तृ० १७ ततः प्राचीनावीती। दक्षिणा
स्यः पितृतीर्थेन त्रींस्त्रीनंजलीन्संप्रयच्छेत्॥ वसवस्तृप्यंतां १ रुद्रास्तृ० २
आदित्यास्तृ० ३ मरुतस्तृ० ४ अश्विनौतृप्यतां ५ ततः पित्रादीन्॥ अस्म
त्पितः अमुकदासामुकगोत्रतृप्यतां। १ अत्रवस्वादिनामसहिता
नामसहितांवापित्रादीनांतर्पणंकार्यमितिमदनपारिजातः। एवंपि
तामहप्रपितामहयोरपि। अस्मन्मातारमुकगोत्रेमुकदेविदातृप्य
तां॥ एवंसर्वेषांप्रमीतानांतर्पणंकृत्वा। तटेतिलांजलिंनिक्षिपेदेतै
र्मंत्रैः॥ देवास्तथासुरायक्षागंधर्वोरगराक्षसाः॥ पिशाचागुह्यकाः
सिद्धाः कूष्मांडास्तरवादयः॥ जलेचराभूनिलयावाय्वाधाराश्चजं
तवः॥ तृप्तिमेतेनयांत्वाशुमद्दत्तेनांबुनाखिलाः॥ नरकेषुसमस्ते
षुयातनासुचयेस्थिताः॥ तेषामाप्यायनायैतद्दीयतेसलिलंमया।

Indira Gandhi National
Centre for the Arts

॥राम॥ येबांधवाबांधवायेयेन्यजन्मनिबांधवाः॥तेतृप्तिमखिलायांतुयश्चा
॥५१॥ स्मत्तोभिवांछति॥यत्रक्वचनसंस्थानांक्षुत्तृष्णोपहतात्मनां॥ते
षांहिदत्तमक्षय्यमिदमस्तुतिलोदकं॥येमेकुलेलुप्तपिंडाःपुत्रदार
विवर्जिताः॥तेषांहिदत्त०१मातृवंश्यामृतायेचपितृवंश्यास्तथैव
च॥तेषांहिदत्त०२ततोयेकेचास्मदितिमंत्रेणवस्त्रंनिष्पीड्याचा
मेत्॥जीवत्पितुर्वस्त्रादिपंवस्थानेषुविशेषमाह॥स्मृतिचंद्रिका
यांयोगयाज्ञवल्क्यः॥कव्यवाडनलःसोमोयमश्चैवार्यमातथा॥ राम
अग्निष्वात्ताःसोमपाश्चतथाबर्हिषदोपिच॥यदिस्याज्जीवत्पि ॥५२॥
तृकएतान्विंद्यात्ततोपितृन्स्मरति॥तिलतर्पणनिषिद्धकालस्तुमत्कृ
तश्राद्धचंद्रिकायांद्रष्टव्यः॥अत्रवक्तव्यमपिशूद्राणांवैश्वदेवादि
कर्मानुनुष्ठानान्नोच्यतइत्यास्तांतावत्॥ ॥इत्याचारार्केशूद्रतर्प

अकृत्वावैश्वदेवंतुनैवेद्यंप्रोनैवेदयेत्॥२

णप्रयोगःप्रासंगिकः॥ ॥अथवैश्वदेवः॥केचित्तु॥विष्णोर्निवेदि
तान्नेनयष्टव्यंदेवतांतरमितिस्कांदवचनाददो नैवेद्यंपश्चाद्वैश्व
देवइत्याहुः॥अन्येतु॥वैश्वदेवंपुराकृत्वानित्येचाभ्युदयेतथा॥स्वा
भीष्टदेवतादिभ्योनैवेद्यंविनिवेदयेत्॥तदन्नंचनगर्ह्यंति॥देवा
विष्ण्वादयोध्रुवमित्याश्वलायनस्मृतावुक्तेरादौवैश्वदेवइति॥
युक्तंचैतत्॥सएषदेवयज्ञोहरहर्गोदानसंमितःसर्वाभीष्टप्रदः
स्वर्गापवर्गश्चतस्मादेनमहरहःकुर्वीततमेनंवैश्वदेवकृतशे
षेणपृथगन्नेनवाकुर्यान्नास्यत्शेषेणवैश्वदेवंकुर्यादितिगर्गप
रिशिष्टेउक्तत्वात्॥इदानींकेचिद्विष्णोर्निवेदितान्नशेषेणवैश्वदे
वंकुर्वंतितत्रमूलंमृग्यं॥वस्तुतस्तुविष्णोर्निवेदितान्नेनेतिकेवल
वैष्णवपरं॥ ॥अथवैश्वदेवविधिःकारिकायां॥ ॥गृहस्थोवैश्वदे

Indira Gandhi National
Centre for the Arts

वारब्धं कर्मप्रारभते दिवा॥ तंत्रं नास्त्यत्र भगवद्वृत्तिकारवचो यथा॥ औ
॥राम॥ पासनाग्निमन्यं वा समिध्याथ हविर्भुजं॥ अन्यं पाकाग्निं समिध्य प्र
॥६७॥ ज्वाल्य॥ प्रज्वालनं मुखेनैव कार्यमित्याह स्मृतिचंद्रिकायां कात्या
यनः॥ जुहूषंश्च हुते चैव पाणिशूर्पस्य दारुभिः॥ न कुर्यादग्निधम
नं न कुर्याद्व्यजनादिना॥ मुखेनैव धमेदग्निं मुखाद्देषोऽध्यजायत
इति॥ मुखेन धमनं नालिकादिव्यवधानेन न साक्षात्कार्यं॥ उच्छिष्ट
पातसंभवात्॥ आश्वलायनः॥ ॥सायंप्रातर्वैश्वदेवो कर्तव्यो बलि ॥राम॥
कर्म च॥ अनश्नतापि कर्तव्यमन्यथा किल्बिषी भवेत्॥ वैश्वदेवो द ॥६०॥
वान्नं न भवेच्च पथक्पथक्॥ प्रातरेव द्विरावृत्त्या कुर्याद्दारसहितो
द्विजः॥ शातातपः॥ वैश्वदेवः प्रकर्तव्यः पंचसूनापनुत्तये॥ पंचसू
ना गृहस्थस्य वर्तंते हरहः सदा॥ कंडणी पेषणी चुल्ली जलकुंभ उ

पस्करः॥ छंदोगपरिशिष्टे॥ यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र
वै॥ उत्तानेन तु हस्तेन अंगुष्ठाग्रेणपीडितं॥ संहतांगुलिपाणिस्तु
वाग्यतो जुहुयाद्धविः॥ शाकं वा यदि वा पत्रं मूलं वा यदि वा फलं॥ संक
ल्पयेद्यदाहारस्तेनाग्नौ जुहुयादपि॥ पाणिनैकेन जुहुयाद्धृदि
सव्यं निधाय वै॥ माधवीये व्यासः॥ जुहुयात्सर्पिषाभ्यक्तं तैलक्षा
रविवर्जितं॥ दध्यक्तं पयसाभ्यक्तं तदभावेंऽभसापि वा॥ व्यासः॥
होमान्नदानरहितं न भोक्तव्यं कदाचन॥ आश्वलायनः॥ वसता
मेकपाके न विभक्तानामपि प्रभुः॥ एकस्तु चतुरो यत्ता कुर्याद्वाग्य
तपर्वकान्॥ वाग्यतो ब्रह्मयज्ञः॥ स तु सर्वेषां पथगेव भवति॥ प
थगप्येकपाकानां ब्रह्मयज्ञो द्विजन्मनां॥ अविभक्ता विभक्ताश्च
पथक्पाका द्विजातयः॥ कुर्युः पथक्पथक्यज्ञान् औजनात्राकृदि
नौ

Indira Gandhi National
Centre for the Arts

॥राम॥ नेदिने॥ गोभिलः॥ यद्येकस्मिन्काले पुनः पुनरन्नं पचेत सकृदेवत
॥६१॥ द्बलिं तत्र कुर्वीताथ यद्येकस्मिन्काले ~~कुर्नकुर्न~~ बहुधान्नं पचेत गृहप
तिर्महानसादेवैतत् बलिं तत्र कुर्वीतेति॥ आश्वलायनमते विभक्ता
नामप्येकपाके ज्येष्ठस्यैवाधिकारो नान्येषां॥ अत्राविभक्तानां पृथ
कूपाके पृथक् वैश्वदेवकरणाकरणविरोधे प्राप्ते व्यवस्थितोयं वि
कल्पः॥ आश्वलायनैस्तदुक्तेः पृथक् कार्यः। तदन्यैरेकएवेति। वैश्व
देवे आश्वलायनो देवताक्रममाह॥ ॥अथ सायंप्रातः सिद्धस्य ह ॥राम॥
विष्यस्य जुहुयादग्निहोत्रदेवताभ्यः सोमाय वनस्पतयेग्नीषोमा ॥६१॥
भ्यामिंद्राग्निभ्यां द्यावापृथिवीभ्यां धन्वंतरय इंद्राय विश्वेभ्यो देवे
भ्यो ब्रह्मणे स्वाहेत्यथ बलिहरणमेताभ्यश्चैव देवताभ्यो अद्भ्य ओषधि
वनस्पतिभ्यो गृहाय गृहदेवताभ्यो वास्तुदेवताभ्य इंद्रायेंद्रपुरुषे

भ्यो यमाय यमपुरुषेभ्यो वरुणाय वरुणपुरुषेभ्यः सोमाय सोमपु
रुषेभ्य इति प्रतिदिशं ब्रह्मणे ब्रह्मपुरुषेभ्य इति मध्ये विश्वेभ्यो दे
वेभ्यः सर्वेभ्यो भूतेभ्यो दिवाचारिभ्य इति दिवा नक्तंचारिभ्य इति
नक्तं रक्षोभ्य इत्युत्तरतः स्वधा पितृभ्य इति प्राचीनावीती शेषं दक्षि
णानि नयेत्॥१॥ अत्र वैश्वदेवे यज्ञत्रयं भवति। देवयज्ञो भूतयज्ञः
पितृयज्ञ इति पूर्वोक्तसूत्रात्॥ तत्र प्रातर्वैश्वदेवमादौ कृत्वा सायं वै
श्वदेव इति क्रमो न तु सायं प्रातरिति। प्रथमं दिवाचारिभ्यो बल्युक्ते
र्वैश्वदेवस्य प्रातरारंभणं भवतीति वृत्तावुक्तत्वात्॥ अत्र बलिश
ब्देन भूतयज्ञ इत्युच्यते॥ स च क्रमाकारउक्तः शौनकेन॥ ॥चक्राका
रेण यो विप्रः सदा भूतबलिं हरेत्॥ सर्वपापविनिर्मुक्तो विष्णुसायु
ज्यमाप्नुयात्॥ ॥अथ वैश्वदेवप्रयोगः॥ ॥अग्नेः पश्चात्प्राङ्मुख

Indira Gandhi National
Centre for the Arts

॥राम॥
॥६२॥

उपविश्याचम्यदेशकालौनिर्दिश्यममोपात्त०र्थंआत्मसंस्कारार्थं
न्नसंस्कारद्वाराचश्री०र्थंप्रातःसायंवैश्वदेवोतंत्रेणकरिष्येइतिसं
कल्प्यपुनस्तत्रदेवयजनंकर्तुमग्न्यावाहनादिकरिष्येइतिचसंक
ल्प्यएह्यग्नइतिमंत्रेणाग्निमावाह्यधमन्याप्रबोध्याग्निरवायांजाता
यांचत्वारीतिमंत्रेणध्यात्वापरिसमूहनपर्युक्षणेकृत्वासिद्धमन्नं
पात्रेनिधायाग्नावधिश्रित्यप्रोक्ष्योदगुद्वास्यपश्चिमभागेनिधाय
त्रेधाविभज्यत्रिःपर्यग्निकृत्वासर्पिषाभ्यज्यविश्वानिनइत्यलंकृत्य
सव्यंपाणितलंहृदयेन्यस्यदक्षिणेनहस्तेनदक्षिणभागादन्नमादा ॥राम॥
यांगुष्ठाग्रेणपीडितंसंहतांगुल्युत्तानपाणिनासमंत्रंजुहुयात्॥ ॥६२॥
तत्रमंत्राः॥ सूर्यायस्वाहा१सूर्यायेदंनममेत्यादित्यागःसर्वत्रापि
ज्ञेयः॥ प्रजापतयेस्वाहेत्युच्चैरुक्त्वैव॥ सोमायवनस्पतयेस्वाहा३अ

ग्नीषोमाभ्यांस्वाहा४इंद्राग्निभ्यांस्वाहा५द्यावापृथिवीभ्यांस्वाहा६
धन्वंतरयेस्वाहा७इंद्रायस्वाहा८विश्वेभ्योदेवेभ्यःस्वाहा९ब्रह्मणे
स्वाहा१०ततःसायंतनवैश्वदेवाहुतयःअग्नयेस्वाहा१प्रजापतय
इत्यादिब्रह्मणइत्यंताःपूर्ववदाहुतीर्हुत्वाचमइत्युपस्थायपुनः
परिसमूहनपर्युक्षणेकृत्वाविभूतिंधारयेदितिदेवयज्ञः॥ ॥अथभू
तयज्ञः॥ ॥भूमिंप्रोक्ष्यमध्यभागादन्नमादायप्रागारभ्येशानीपर्यं
तंचक्राकारनैरंतर्येणसूर्यायस्वाहेतिपूर्वोक्तैर्दशभिः।अद्भ्यःस्वा०१
ओषधिवनस्पतिभ्यःस्वा०२गृहाय०३गृहदेवताभ्यःस्वा०४वास्तुदे
वताभ्यःस्वाहा५इतिपंचबलिंश्चदत्वाचक्राद्बहिःप्राच्यांप्राक्संस्थं
इंद्रायस्वाहा१इंद्रपुरुषेभ्यःस्वा०२दक्षिणतउदक्संस्थंयमाय०३
यमपुरुषेभ्यःस्वा०४पश्चिमतःप्राक्संस्थंवरुणाय०५वरुणपुरु

Indira Gandhi National
Centre for the Arts

षेभ्यः स्वा॰६ उत्तरस्यामुदक् संस्थं। सोमाय॰७ सोमपुरुषेभ्यः॰८
चक्रमध्ये ब्रह्मणे स्वाहा॰ तत्प्राच्यां ब्रह्मपुरुषेभ्यः स्वा॰ ब्रह्मणो
दक्षिणतो विश्वेभ्यो देवेभ्यः स्वाहा॰ ब्रह्मणः पश्चिमतः सर्वेभ्यो
भूतेभ्यः स्वाहा॰ ब्रह्मण उत्तरतो दिवाचारिभ्यः स्वा॰ चक्रादुत्तर
तो क्षौरेभ्यः स्वाहेति दत्वा पञ्चपस्पर्श्य तदुत्तरतो भूमिं प्रोक्ष्य द्विती
यभूतयज्ञं कुर्यात्॥ तत्र सूर्यपदस्थाने ग्निपदं। दिवापदस्थाने
नक्तमिति विशेषः शेषं पूर्ववदिति भूतयज्ञः॥ ॥अथ पितृयज्ञः राम
॥ ॥प्राचीनावीती॥ आग्नेय्यभिमुखो सव्यं जान्वाच्योत्तरभागा ॥६३॥
दंगुष्ठपर्वमात्रम न्नं गृहीत्वा पराचीन दक्षिणपाणिना चक्राद्दक्षि
णतः स्वधा पितृभ्य इति मंत्रेण बलिं दत्वा पञ्चपस्पर्श्य द्वितीय चक्रा
दक्षिणतः स्वधा पितृभ्य इति मंत्रेण बलिं दत्वा पञ्चपस्पर्श्य द्वितीय

चक्राग्नेय्यभागे च तथैव दत्वा पञ्चपस्पर्श्य पितृयज्ञान्तशेषेण चक्राद्द
क्षिणे नैरृत्यकोणे श्यामाय॰ चक्राद्वायव्यकोणे शबलाय स्वाहेत्युभयत्र
बलिं दत्वा गृहांगणे जलमासिच्य काकेभ्यस्तद्बहिर्बलिं दद्यादिति पितृ
यज्ञः॥ ॥अत्र सर्वत्रोद्देशत्यागौ कुर्यात्॥ ॥इति शौनकोक्तश्वकाका
रः प्रयोगः॥ ॥कारिकाकृत्तु नराकारमंगीकृत्य वैलक्षण्यमाह॥ तत्र
सूर्यादिब्रह्मांतान् दशबलीन् प्राक् संस्थं दत्वा किंचिदंतरालं त्यक्त्वा
ऽग्न्यादिवास्तुदेवताभ्य इत्यंतान् पंचबलीन्दत्वाऽग्नो दत्तबलेः पश्चि
मतः इंद्राय॰ तदुत्तरतः इंद्रपुरुषेभ्यः अंतराले दक्षिणतो यमाय॰ त
दुत्तरतो यमपुरुषेभ्यः॰ ब्रह्मणे दत्तबलेः प्राक् वरुणाय॰ तदुत्तरतो
वरुणपुरुषेभ्यः अंतराले उत्तरतः सोमाय॰ तदुत्तरतः सोमपुरुषे
भ्यः॰ अंतराले ब्रह्मणे॰ तत्प्राक् ब्रह्मपुरुषेभ्यः॰ विश्वेभ्यो देवेभ्यः॰३

Indira Gandhi National
Centre for the Arts

सर्वेभ्योभूतेभ्यः भदिवाचारिभ्यइत्युत्तरे। रक्षोभ्यःस्वाहेतिसर्वेनिरतः।
॥राम॥ ततोपसव्येनाग्नेयीस्वधापितृभ्यइतिपुरुषाकारो वैश्वदेवप्रयोगः॥॥
॥६७॥ अथमनुष्ययज्ञः॥ ॥मनुः॥अतिथिभ्योन्नदानंचनयज्ञःसंतुपंचमः॥
शौनकः॥ पुष्कलस्यप्रमाणान्नमन्यपात्रेसमुद्धरेत॥अक्षतोदकह
स्तेनचोपवीतीनिवेदयेत॥योगिस्यःसनकादिस्यइदमन्नमितीति
च॥ दद्यादन्नंतद्विप्रायकुर्याद्गृहबलिंतथा॥अंनभुग्देर्भवेदाशुघन्न
दोषैर्नलिप्यते॥ब्राह्मणभोजनाशक्तौपराशरः॥नयतासिद्धयेद
द्याद्भिक्षांसंकल्पपूर्वकां॥अभ्यागतंब्राह्मणंप्राङ्मुखमुपवेश्यगंधा ॥राम॥
दिनासंपूज्यनिवीतीब्राह्मणभोजनपर्याप्तमन्नंपात्रस्थंसनका ॥६७॥
दिमनुष्येभ्यइदमस्तुनममेत्युक्तातेनान्नेनभोजयेत्॥तदभावेभि
क्षात्रयंपूर्ववत्संकल्प्यभिक्षुभ्योदद्यादितिमनुष्ययज्ञः॥ यदिवै

श्वदेवात्प्रागेवभिक्षुकेसमायातेविशेषमाहगौतमः॥वैश्वदेवे
तुसंप्राप्तेभिक्षुकेगृहमागते॥उद्धृत्यवैश्वदेवार्थंभिक्षांदत्वाविस
र्जयेत॥वैश्वदेवाकृतंपापंशक्तोभिक्षुर्व्यपोहतु॥नहिभिक्षुकृतान्दो
षान्वैश्वदेवोव्यपोहति॥ इयंचभिक्षास्वतंत्रफलार्था॥भिक्षादान
प्रशंसामाह।यमः।सत्कृत्यभिक्षवेभिक्षांयःप्रयच्छतिमानवः॥गोप्र
दानसमंपुण्यंतस्याहभगवान्यमइति॥भिक्षुकानाहयाज्ञवल्क्यः॥
यतिश्चब्रह्मचारीचविद्यार्थीगुरुपोषकः॥अध्वगःक्षीणवृत्तिश्चष
डेतेभिक्षुकाःस्मृताः॥अतिथयश्चोक्तास्तेनैव॥शूद्रोवायदिचांडा
लःशत्रुर्वाब्रह्मघातकः॥आगतोवैश्वदेवांतेसोतिथिःस्वर्गदायक
इति॥इतिपंचमहायज्ञाः॥ ॥एषामकरणेप्रायश्चित्तमाहव्यासः॥
होमान्नदानरहितंनभोक्तव्यंकदाचन॥अकृत्वापंचयज्ञान्स्तुभुक्त्वाचां
द्रायणंचरेत॥यदिदेवान्माध्याह्निकंदिवानजातंतदारात्रौप्रहर

Indira Gandhi National
Centre for the Arts

पर्यंतंकार्यमित्याहमरीचिः॥ रात्रौप्रहरपर्यंतंदिवाकृत्यानिकारयेत्॥
॥राम॥ अवगाहंब्रह्मयज्ञंसौरंचपरिवर्जयेत्॥ आश्वलायनैस्तुरात्रावपि
॥६५॥ ब्रह्मयज्ञःकार्यः॥ तस्यद्वावनध्यायौयदात्माशुचिर्यद्देशइतितत्सू
त्रात्॥ मध्यंदिनेप्रबलमधीयीतयएवंविद्वान्महारात्रेउषस्युदितेत
थाग्रामेमनसास्वाध्यायमधीयीतदिवानक्तंवेतिवृत्तावुक्तत्वाच्च॥
अन्येतु केचिद्रात्रावपिब्रह्मयज्ञमिच्छंति॥ ग्रामेस्वाध्यायमधीयीत
दिवानक्तंवेत्यापस्तंबविषयं॥ तथाचस्मृतिः॥ आचार्याःकेचिदि ॥राम॥
च्छंतिरात्रावपिचतर्पणं॥ तद्यजुःशाखिनामेवनान्येषांतुविधी ॥६५॥
यतइतिरघुनाथकृताह्निकावृत्तेः॥ ॥विधुरस्यवैश्वदेवेविशेष
उक्तोवृद्धवसिष्ठेन॥ अनाग्निकस्तुयोविप्रःसोमंव्याहृतिभिःस्व
यं॥ कृत्वाशाकलमंत्रैस्तुशेषादन्नाद्बलिंहरेत्॥ अथप्रयोगः॥

ॐ

पूर्ववदग्निस्थापनादिकृत्वान्नमादाय। भूःस्वाहाअग्नयइदं॥
ॐभुवःस्वाहावायवइदं॰ स्वःस्वाहासूर्यायेदं॰। ॐभूर्भुवःस्वःस्वाहाप्रजा
पतयइदं॰। अथशाकलमंत्राः॥ देवकृतस्यैनसोवयजनमसिस्वा
हा। अग्नयइदं॰। ॐमनुष्यकृतस्यैनसोव॰ २ पितृकृतस्यैनसोव॰ ३
ॐआत्मकृतस्यैनसोव॰ ४ अन्यकृतस्यैनसोव॰ ५ अस्मत्कृतस्यै
नसोव॰ ६ यद्दिवानक्तंचैनश्चकृमतस्याव॰ ७ यत्स्वपंतश्चजाग्रत
श्चैनश्चकृतेमेस्याव॰ ८ यत्सुषुप्तश्चजाग्रतश्चैनश्चकृमतस्याव॰ ९
यद्विद्वांसश्चाविद्वांसश्चैनश्चकृमतस्याव॰ १० एनसएनसोवयज
नमसिस्वाहेत्येकादशाहुतीर्हुत्वासर्वत्राग्नयइदंनममेत्युद्देशत्या
गोपूर्ववत्कुर्यादिति॥ ततोदेवंसंपूज्यनैवेद्यंप्रदर्श्यनित्यश्राद्धंकु
र्यात्॥ तत्रषड्दैवतंविश्वेदेवहीनंदक्षिणापिंडावाहनस्वधाकारा

Indira Gandhi National Centre for the Arts

॥राम॥ ग्नौकरणं ब्रह्मचर्यादिनियमरहितं च कार्यं॥ तत्र दक्षिणादाने विक
॥६६॥ ल्पः॥ विकल्पविधायकं वाक्यं तु मत्कृतश्राद्धचंद्रिकायां द्रष्टव्यं॥ देश
कालौ निर्दिश्यास्मत्पितृपितामहप्रपितामहानाममुकगोत्राणामम
मुकशर्मणां वसुरुद्रादित्यस्वरूपाणां सपत्नीकानां तथा मातामह०
कानां नित्यश्राद्धं करिष्ये इति संकल्प्य निमंत्र्य चंदनादिना संपूज्य
पलाशादिपात्रेऽन्नं परिविष्य गायत्र्या प्रोक्ष्य पृथिवी ते पात्रमित्या
दि ब्रह्मार्पणांतं कृत्वा ब्राह्मणं भोजयेत्॥ अशक्तौ स्वपंक्तौ पित्रुद्देशे ॥राम॥
न ब्राह्मणमात्रं भोजयेत्॥ तदशक्तावपि किंचिदन्नमुद्धृत्यैतदन्नं ॥६६॥
पितृभ्यः स्वधा नम इत्युक्त्वा ब्राह्मणाय दद्यात्॥ एतच्च नित्यं॥ नित्य
श्राद्धाकरणे त्वर्चं तरति दशाधा जपेदिति॥ ऋग्विधाने प्रायश्चि
त्तश्रवणात्॥ अथ भोजनविधिः॥ ॥आश्वलायनस्मृतौ॥ अष्टम्यां

श्च चतुर्दश्योरात्रावश्नाति नित्यशः॥ एकादश्यामुपवसेच्छुक्ले पक्षे
विशेषतः॥ अर्कद्विपर्वरात्रौ च चतुर्दश्यष्टमी दिवा॥ एकादश्याम
होरात्रं भुक्त्वा चांद्रायणं चरेदिति॥ व्यासः॥ पंचार्द्रो भोजनं कुर्यात्प्रा
ङ्मुखो मौनमास्थितः॥ हस्तौ पादौ तथैवास्यमेषु पंचार्द्रता मता॥ ह
स्तौ पादौ च प्रक्षाल्याचम्येत्यर्थः॥ आश्वमेधिके॥ आर्द्रपादस्तु भुं
जीयात्प्राङ्मुखश्चासने शुचौ॥ पादाभ्यां धरणीं स्पृष्ट्वा पादेनैकेन वा
पुनरिति॥ उपलिप्ते समे स्थाने शुचौ श्लक्ष्णसमन्विते॥ चतुरस्रं त्रि
कोणं च वर्तुलं चार्धचंद्रकं॥ कर्तव्यमानुपूर्व्येण ब्राह्मणादिषु मंडलं
॥हेमाद्रावत्रिः॥ पंचाशत्पलिकं कांस्यं ह्यधिकं भोजनाय वै॥ गृहस्थै
स्तु सदा कार्यमभावे रौप्यहेमयोः॥ क्वचित्तं निषेधः॥ तदाह स्मृतिचं
द्रिकायां प्रचेताः॥ तांबूलाभ्यंजनं चैव कांस्यपात्रे च भोजनं॥ यतिश्च

Indira Gandhi National
Centre for the Arts

॥राम॥
॥६७॥

ब्रह्मचारी च विधवा च विवर्जयेत् दिति॥ अत्र दिङ्नियमः कौर्मे॥ प्राङ्मु
खो नानि भुंजीतेति॥ मनुः॥ आयुष्यं प्राङ्मुखो भुंक्ते यशस्वी दक्षिणा
मुखः॥ धनवान् पश्चिमायां तु धर्मवानुत्तरामुखः॥ पुत्रवांस्तूत्तरामु
खो नाश्नीयात॥ पुत्रवान् स्वगृहे नित्यं नाश्नीयादुत्तरामुखः॥ सो
मवारे तथाभ्यंगं वर्जयेत्तु सदा बुध इति निषेधात्॥ अत्राभ्यंगप
दात्सर्षपादितैलाभ्यंग एव निषिद्धो न तु तिलतैलाभ्यंगः॥ तैलाभ्यं
गनिषेधे तु तिलतैलं निषिध्यते॥ अभ्यंगस्य निषेधे तु सार्षपादि ॥राम॥ ॥६७॥
निषिध्यत इति॥ मदनरत्ने प्रचेतसो वाक्यात्॥ जीवन्मातृपितृक
स्तु दक्षिणामुखो पि नाश्नीयात्॥ उक्तं च प्रयोगपारिजाते स्मृति
मंजर्यां॥ पितरौ जीवमानौ चेन्नाश्नीयाद्दक्षिणामुखः॥ तयोस्तु जी
वतो नैकस्तथैव नियमः स्मृत इति॥ विज्ञानेश्वरस्त्व॥ अनेकमातृ

स्मृत्यंतरे॥ यो वेष्टितशिरा भुंक्ते यो भुंक्ते दक्षिणामुखः॥ वामपादकरो भुंक्ते तुल्यं गो
मांसभक्षणं॥ ॥

हीनानां यशस्यं दक्षिणामुखं॥ भोजनमिति शेषः॥ मनुः॥ सायंप्रा
तर्द्विजातीनामशनं स्मृतिचोदितं॥ नांतरा भोजनं कार्यमग्निहोत्रस
मो विधिरिति॥ न चाग्निहोत्रसमो विधिरित्युक्तेः॥ प्रातरेव भोजनं
कार्यमिति वाच्यं॥ दिवसस्य पंचमे तु भागे भोजनमाचरेदिति का
त्यायनोक्तेः॥ अतोत्र प्रातः शब्दो मध्याह्निकोत्तरकालपरः॥ अ
थ परिवेषणं स्मृत्यंतरे॥ शाकादीन् पुरतः स्थाप्य भक्ष्यं भोज्यं च वा
मतः॥ अन्नं मध्ये प्रतिष्ठाप्य दक्षिणे घृतपायसी॥ ॐ दत्ते परमान्ने
च आज्यपात्रं यदि स्थितं॥ तदाज्यं च भवेद्दत्तं तदन्नं मांसमुच्यते॥
शातातपः॥ हस्तदत्तानि चान्नानि प्रत्यक्षं लवणं तथा॥ मृत्तिका
भक्षणं समं गोमांसाशनवत्स्मृतं॥ प्रत्यक्षमपि लवणं हस्तदत्तमे
व निषिद्धं॥ तथा च पैठीनसिः॥ लवणं व्यंजनं चैव घृतं तैलं तथैव च॥

Indira Gandhi National
Centre for the Arts

आचारार्क

लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥ इति ॥ अत्र पाणौ भक्षितो । सैंधव
॥राम॥ लवणं यच्च यत्र स्यात् मृद्विकं भवेत् ॥ पवित्रे परमेस्ते ते प्रत्यक्षे अपि नित्य
॥६८॥ शः इति ॥ ॥ब्रह्मपुराणे॥ अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत् ततः ॥ अस्मा
कं नित्यमस्त्वेतदिति भक्त्याथ वंदयेत् ॥ पात्राद्ग्रासमुद्धृत्य सम्यक्पात्रां
तरे क्षिपेत् ॥ जलमादाय मंत्रेण गोग्रासं विनिवेदयेत् ॥ मंत्रस्तु प्रयोगे वक्ष्य
ते गृह्यपरिशिष्टे ॥ आर्द्रपाणिराचांतः शुचौ देशे प्रत्यङ्मुखः प्राङ्मुखो वा
पविश्य चतुरस्रं मंडले पात्रं स्थाप्य मंत्रं प्रणवव्याहृतिपूर्वया सावित्र्याभ्यु
क्ष्य स्वादुः पिता मधो पितो इत्यभिमंत्र्य सत्यं त्वर्तेन परिषिंचामीति दिवा प ॥राम॥
रिषिंचेत् ऋतं त्वा सत्येन परिषिंचामीति रात्रावथ दक्षिणतो भुवनपतय ॥६८॥
भुवनपतये भूतानां पतये इति नमोंतैः प्राक्संस्थं वा बलिं विकीर्य समा
हिता भूतापस्तरणमसीत्यपः प्राश्य सव्येन पाणिना पात्रमालभ्य तर्ज
नीमध्यमांगुष्ठैः प्राणाय मध्यमानामिकांगुष्ठैरपानाय नामिकाकनि
प्रत्यक्सा॰

ष्ठांगुष्ठैर्व्यानाय कनिष्ठतर्जन्यंगुष्ठैरुदानाय सर्वाभिरंगुलीभिः समा
नाय च मुखे जुहुयात् देवं वाग्यतो भूत्वा अमृतापिधानमसीत्यपिधानं
प्राश्य नोधित मुखपादपाणिर्हि रात्रमेदेवं भुंजानो ग्निहोत्रफलमश्नुते ब
लपुष्टिमान् सर्ववान् सर्वमायुरिति ॥ भविष्यपुराणे विशेषः ॥ भोजना
त्किंचिदन्नाग्रं धर्मराजाय वै बलिं ॥ दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरे
त् ॥ प्रेतबलिमंत्रोप्यग्रे वक्ष्यते ॥ तस्य चोद्धरणं कार्यमित्युक्तं रामार्चनचंद्रि
कायां ॥ भोजनादौ बलिर्मुक्तः स्याद्ध उद्धृत्य भोजनं ॥ अनुद्धृत्य तु यो भुंक्ते प्राणा
यामाष्टकं चरेत् ॥ स्मृत्यंतरे ॥ चित्राहुतीरनुद्धृत्य भुंक्ते यो ग्रासपंचकं ॥
अघं स केवलं भुंक्ते ज्ञानतो ज्ञानतोपि वेति ॥ शौनकः ॥ स्वाहांताः प्रणवा
द्याश्च नाम्ना मंत्राश्च नायव इति ॥ आश्वमेधिके ॥ यथा रसं न जानाति जि

Indira Gandhi National
Centre for the Arts

लेह्यं पेयं च विविधं हस्तदत्तं न भक्षयेत् ॥ इति ॥ शूलपाणौ भविष्ये । सैंध
॥राम॥ वं लवणं यच्च यच्च सामुद्रिकं भवेत् ॥ पवित्रे परमे ह्येते प्रत्यक्षे अपि नित्य
॥६८॥ शइति ॥ ॥ब्रह्मपुराणे॥ अन्नं दृष्ट्वा प्रणम्यादौ प्रांजलिः कथयेत् ततः ॥ अस्मा
कं नित्यमस्त्वेतदिति भक्त्याथ वंदयेत् ॥ पात्राद्ग्रासं समुद्धृत्य सम्यक् पात्रां
तरे क्षिपेत् ॥ जलमादाय मंत्रेण गोग्रासं विनिवेदयेत् ॥ मंत्रस्तु प्रयोगे वक्ष्य
ते गृह्यपरिशिष्टेपि ॥ आर्द्रपाणिराचांतः शुचौ देशे प्रत्यङ्मुखः प्राङ्मुखो वो
पविश्य चतुरस्रमंडले पात्रस्थमन्नं प्रणवव्याहृतिपूर्वया सावित्र्याभ्यु
क्ष्य स्वादोपितामधोपितो इत्यभिमंत्र्य सत्यं त्वर्तेन परिषिंचामीति दिवा प ॥राम॥
रिषिंचेदृतं त्वा सत्येन परिषिंचामीति रात्रावथ दक्षिणतो भुवि भूपतये ॥६८॥
भुवनपतये भूतानां पतये इति नमोंतैः प्राक्संस्थं वा बलिं विकीर्य समा
हितोमृतोपस्तरणमसीत्यपः प्राश्य सव्येन पाणिना पात्रमालभ्य तर्ज
नीमध्यमांगुष्ठैः प्राणाय मध्यमानामिकांगुष्ठैरपानाय अनामिकाकनि

प्रत्यक्संस्थं

ष्ठांगुष्ठैर्व्यानाय कनिष्ठतर्जन्यंगुष्ठैरुदानाय सर्वाभिरंगुलीभिः समा
नाय च मुखे जुहुयाद्देवं वाग्यतो भूत्वा मृतापिधानमसीत्यपिधानं
प्राश्य शेषोधितमुखपादपाणिर्द्विराचमेदेवं भुंजानोग्निहोत्रफलमश्नुते ब
लपुष्टिमान्नः सर्ववान् सर्वमायुरिति ॥ भविष्यत्पुराणे विशेषः ॥ भोजना
त्किंचिदन्नाग्रं धर्मराजाय वै बलिं ॥ दत्वाथ चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरे
त् ॥ प्रेतबलिमंत्रोप्यग्रे वक्ष्यते ॥ बल्युद्धरणं कार्यमित्युक्तं रामार्चनचंद्रि
कां ॥ भोजनादौ बलिर्मुक्तः साहि उद्धृत्य भोजनं ॥ अनुद्धृत्य तु यो भुंक्ते प्राणा
यामाष्टकं चरेत् ॥ स्मृत्यंतरे ॥ चित्राहुतीरनुद्धृत्य भुंक्ते यो ग्रासपंचकं ॥
अघं स केवलं भुंक्ते ज्ञानतो ज्ञानतोपि वेति ॥ शौनकः ॥ स्वाहांताः प्रणवा
द्याश्च नाम्ना मंत्राश्च वायव इति ॥ आश्वमेधिके ॥ यथा रसं न जानाति जि

Indira Gandhi National
Centre for the Arts

न्नाप्राणाहुतौ नृप॥ तथा समाहितः कुर्यात्प्राणाहुतिमतंद्रित इति॥ अपरा
॥राम॥ र्के त्रिः॥ मधुपर्के च सोमे च अप्सु प्राणाहुतीषु च॥ नोच्छिष्टस्य भवेद्दोष
॥६१॥ स्तत्रेश्वरवचनं यथा॥ विष्णुपुराणे॥ प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये च कठिना
शनः॥ अंते पुनर्द्रवाशी तु बल्यारोग्ये न मुंचति॥ अष्टौ ग्रासा मुनेर्भक्ष्याः षो
डशारण्यवासिनः॥ द्वात्रिंशत्तु गृहस्थस्य ह्यमितं ब्रह्मचारिणः॥ इति म
नुः॥ भोजनं तु न निःशेषं कुर्यात्प्राज्ञः कथंचन॥ अन्यत्र दधिसक्त्वाज्यप
ललक्षीरमध्वपरति। पललं तिलमिश्र ओदनः॥ प्राणाहुतिग्रहणोत्तरं ॥राम॥
पात्रेयं त्वादौ स्थाप्यमित्याह व्यासः॥ न्यस्तपात्रस्तु भुंजीत पंच ग्रासान्म ॥६१॥
हामुने॥ शेषमुद्धृत्य सोत्तद्यं पित्रर्थे तु न चोद्धरेदिति॥ बृहस्पतिः॥ न
स्पृशेद्वाम हस्तेन भुंजानोऽन्नं कदाचन॥ न पादौ न शिरो बस्तिं न पदा भा
जनं स्पृशेदित्यादि निषेधास्त्वाचारमयूखादिषु द्रष्टव्याः॥ देवलः॥

भुक्तोच्छिष्टं समाघ्राय सर्वास्माद्घृतवर्जितं॥ उच्छिष्टभागधेयेभ्यः सोदकं
निर्वपेद्भुवि॥ अमृतापिधानमसीत्यपः प्राश्य भुवि क्षिपेत्॥ उत्थाय बहिरा
गत्य मुखहस्तादि शोधयेदिति स एव॥ आचम्य च ततः कार्यं दंतकाष्ठस्य भ
क्षणं॥ भोजने दंतलग्नानि निर्हृत्याचमनं चरेत्॥ दंतलग्नमसंहार्यं लेपम
न्येन दंतवत्॥ न तत्र बहुशः कुर्याद्यत्नमुद्धरणे प्रतीति॥ ॥अथ प्रयोगः॥
पाणिपादौ प्रक्षाल्याचम्य श्रीपर्ण्यादिपीठे प्राङ्मुखः प्रत्यङ्मुखो वा उप
विश्य भूमिं प्रोक्ष्य चतुरस्रं मंडलं कृत्वा तदुपरि हेमरूप्ययोरभावे द्विपं
चाशत्पलपरिमितं कांस्यपात्रं निधाय परिवेषणं कारयित्वा तस्मादन्ना
द्गोग्रासार्थमन्नं पात्रोत्तरे कृत्वा॥ सौरभेय्यः सर्वहिताः पवित्राः पुण्य
राशयः॥ प्रतिगृह्णंतु मे ग्रासं गावस्त्रैलोक्यमातर इति मंत्रेण गवे ग्रा
श्री॰ सं दत्वाचम्य प्रांजलिरन्नं प्रणम्यास्माकं नित्यमेतदस्त्विति प्रार्थ्य ॐ

Indira Gandhi National
Centre for the Arts

॥राम॥ ॥७०॥ भू॰ तत्स॰ महि। धियो॰ दित्यनेनाभ्युक्ष्य। स्वादोपितोमधोपितोवयंत्वावद्वम
हे॥ अस्माकमविता भवेत्यभिमंत्र्य। सत्यंत्वर्तेन परिषिंचामीति दिवा रात्रौ
तु ऋतंत्वा सत्येन परिषिंचामीति प्रादक्षिणमन्नं परिषिच्य दक्षिणतो भु
व्युदकधारां प्राक्संस्थां कृत्वा तत्र भूपतये नमः भुवनपतये नमः॥ भूता
नां पतये नमः॥ धर्माय नमः॥ चित्रगुप्ताय नमः॥ यत्र क्वचन संस्थानां क्षु
त्तृष्णोपहतात्मनां॥ प्रेतानां तृप्तयेक्षय्यमिदमस्तु यथासुखमिति प्रेतं
बलिं चैवं बलिषट्कं प्राक्संस्थं दत्वोपर्युदकं दत्वा बलीनुद्धृत्य हस्तं प्र
क्षाल्यापोशनार्थं जलमादाय वामहस्तेन मध्यमानामिकांगुष्ठैर्भोजन ॥राम॥
पात्रमालभ्यान्नं ब्रह्मेति ध्यात्वा समाहितो मृतोपस्तरणमसीति निःश ॥७०॥
ब्दं पीत्वा घृताक्तमन्नं पूर्वोक्ततत्तदंगुलिभिः सर्वाभिर्वा स्ये पंच प्राणाहु
तीर्जुहुयात्तत्र मंत्राः॥ ॐ प्राणाय स्वाहा। प्राणायेदं न मम॥ ॐ अपानाय॰ अपा॰

व्याना॰
स्वा

ॐ व्यानाय स्वाहा। ॐ उदानाय स्वा॰ उदाना॰ ॐ समानाय॰ समानायेदं॰ ॐ
ब्रह्मणे॰ ब्रह्मण॰। ततो जलं स्पृष्ट्वा यथेष्टं लौकिकवाक्यान्यनुच्चारयन्केव
ले दृष्टदेवतां स्मृत्वा भोजनं कुर्यात्॥ एतच्च भोजनं रहसि कार्यं तथा च स्मृति
चंद्रिकायां देवलः॥ आहारं तु रहः कुर्याद्विहारं चैव सर्वदा॥ गुप्ताभ्यां लक्ष्मि
युक्तः स्यात्प्रकाशे हीयते श्रियेति। ततो भोजनांते पात्रस्थमन्नं किंचिद्गृहीत्वा
प्राग्घ्राय भूमौ विसृज्य उत्तरापोशनार्थं जलमादाय अमृतापिधानमसी
त्यर्धं पीत्वा ई रौरवे पूयनिलये पद्मार्बुदनिवासिनां॥ अर्थिनामुदकं दत्त
मक्षय्यमुपतिष्ठतु इति मंत्रेण पितृतीर्थेन भूमौ निषिच्य प्रांगणाद्वा
गत्य मृद्भिरद्भिः पाणिमुखे संशोध्य षोडशगंडूषान्कृत्वा दंतकाष्ठेन दंता
न्संशोध्य हस्तौ पादौ च प्रक्षाल्य भोजनपात्रे प्रक्षालनं तद्देशसंमार्जनं च
कारयित्वा चम्य प्यायस्वेति भुक्तमन्नमनुमंत्र्य प्रणवेनात्मानं ब्रह्मणि सं

Indira Gandhi National Centre for the Arts

॥राम॥ योज्यजलेन हस्तौ निघृष्य तज्जलमंगुष्ठाभ्यामक्ष्णोर्निषिंचेत्॥ तत्र मंत्रः॥
॥७१॥ शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ॥ भुक्तमात्रः स्मरेद्यस्तु चक्षुस्त
स्य न हीयत इति॥ ततः शतपदं गत्वा स्वासने उपविश्य॥ अगस्तिरग्निर्वड
वानलश्च भुक्तं मयान्नं जरयत्वशेषं॥ सुखं ममैतत्परिणामसंभवं यच्छत्व
रोगं मम चास्तु देह इत्युदरं परिमृज्य तांबूलं भक्षयेत्॥ अथ तांबूलभक्ष
णविधिमाह॥ मार्कंडेयः॥ भूयोप्याचम्य कर्तव्यं ततस्तांबूलभक्षणं॥ वसि
ष्ठः॥ सुपूगं च सुपत्रं च चूर्णेन च समन्वितं॥ दत्वा तु द्विजदेवेभ्यस्तांबूलं च ॥राम॥
र्वयेद्द्विजः॥ पर्णमूले भवेद्व्याधिः पर्णाग्रे पापसंभवः॥ चूर्णपर्णं क्षिपेदा ॥७१॥
युः शिरा बुद्धिविनाशिनी॥ तस्मादग्रं च मूलं च शिरां चैव विशेषतः॥ चू
र्णपत्रं वर्जयित्वा तांबूलं खादयेद्बुध इति॥ ॥इति श्रीभारद्वाजमहादेवभ
ट्टात्मजदिवाकरकृते आचारार्के पंचमभागकृत्यं॥ ॥वेणुसंभवनिना

दमोहिता गोपिकास्तटमुपेत्य यामुनं॥ येन सार्धमरमंत संभ्रमात्तं भजा
मि वसुदेवनंदनं॥ ॥अथ षष्ठभागकृत्यमाह दक्षः॥ इतिहासपुराणाद्यैः
षष्ठसप्तमकौ नयेत्॥ अष्टमे लोकयात्रा तु बहिः संध्या ततः पुनः॥ यमः॥
रवेरस्तमयात्पूर्वं घटिकैकाथ वा भवेत्॥ सायंसंध्यामुपासीत कुर्याद्धो
मं च पूर्ववत्॥ सायंसंध्यायां विशेषो लिख्यते शौनकः॥ अग्निश्चेत्यनु
वाकेन सायंकाले पिबेदपः॥ इदं मंत्राचमनं॥ अथार्घ्यदानं॥ तच्च प्रात
स्तिष्ठन्नर्घ्यदानं सायंतत्पवित्रान्भुवि॥ इति यमवाक्यात्सायंसंध्याया
मुपविश्यैव केचिदर्घ्यदानं कार्यमित्याहुस्तच्चिंत्यं॥ सायंतत्पवित्रान्भु
वीति वाक्यं तु शाखांतरविषयं आश्वलायनैस्तिष्ठद्भिरेवार्घ्यदानं
कार्यं॥ जलमंजलिनादाय गायत्र्या चाभिमंत्रितं॥ रवेरभिमुखं स्थि
त्वा स्त्रिरूर्ध्वं संध्ययोः क्षिपेदिति शौनकोक्तेश्च गृह्यपरिशिष्टेप्युक्तं॥ अ

Indira Gandhi National
Centre for the Arts

थाचम्य दर्भपाणिः पूर्णमुदकांजलिमुद्धृत्यादित्याभिमुखः स्थित्वा प्रण
वव्याहृतिपूर्वया सावित्र्या त्रिरर्घ्यं निवेद्य क्षिपेदिति॥ श्रीमातामहचर
णानां पूर्ववत्त्रिरर्घ्यं दत्वेति वदतामयमेवाशयः प्रयोगपारिजातादयः।
सर्वे वाजपेययाजिनश्चैवमेवाहुः॥ जपे विशेषः कारिकायां॥ अर्धास्त
मितआदित्ये पश्चिमस्य यउत्तरः॥ भागस्तन्मुख आसीनः सावित्रीं वा
ग्यतो जपेदिति॥ उत्तरतः प्रतीच्या अष्टमो भाग इत्यर्थः॥ देशोष्टधावि
भक्तायाः प्रतीच्या भागसप्तमं॥ हित्वा दक्षिणतोन्यस्तु योष्टमो भाग उत्त
रः॥ अस्याभिमुखतो विप्रो भूत्वा प्रयतमानसः॥ जपन्नासीत सावि
त्रीं संध्यां कृत्स्नमतं द्वितइति शौनकोक्तेः॥ उपस्थाने विशेषः शौनके। ॥राम॥ ॥७२॥
इमं मे वरुणेत्यादि सायंकाले विशेषत इति॥ व्यासोपि॥ जपेद्वारुण
मंत्रांस्तु इमं मे वरुणादिकान्॥ चतुर्मंत्रान्विशेषतः संध्याफलमवा

प्नुयादिति॥ ॥अथ प्रयोगः॥ तत्र हस्तौ पादौ प्रक्षाल्य द्विराचम्य प्राणा
नायम्य ममोपात्त॰ र्थं सायं संध्यामुपासिष्य इति पूर्ववदथ ममार्ज
नांतं कृत्वा हस्ते जलमादाय। अग्निश्चेत्यस्यानुवाकस्य याज्ञवल्क्यु
पनिषद ऋषिः॥ अग्निमन्युमन्युपतयोत्यहानि देवताः॥ गायत्रीपंक्ति
र्विराट्छंदांसि। मंत्राचमने॰। ओं अग्निश्च मा मन्युश्च मन्युपतयश्च म
न्युकृतेभ्यः॥ पापेभ्यो रक्षंतां॥ यदह्ना पापमकार्षं। मनसा वाचा हस्ता
भ्यां॥ पद्भ्यामुदरेण शिश्ना॥ अहस्तदवलुंपतु॥ यत्किंच दुरितं मयि॥
इदमहं मामम तयोनौ॥ सत्ये ज्योतिषि जुहोमि स्वाहेति पीत्वा पूर्ववद्द्वि
राचम्य द्वितीयतृतीयचतुर्थमार्जनाद्यघमर्षणांतं कृत्वा पश्चिमाभि
मुखस्तिष्ठन्पाणिभ्यां जलमादाय सावित्र्याभिमंत्र्य श्रीसवित्र इद
मर्घ्यं समर्पयामी ति त्रिर्दद्यात्॥ ततो सावादित्यो ब्रह्मेति आदि

Indira Gandhi National
Centre for the Arts

आचारार्क॰

स्यमंडलमध्यस्थां श्यामां श्यामांबरानुलेपनस्रगाभरणामेकवस्त्री
॥राम॥ क्रौं रां खव[illegible]पद्मां कचतुर्भुजां गरुडासनारूढां विष्णुदेवत्यां
॥७३॥ सामवेदमुद[illegible]स्वर्लोकाधिष्ठात्रीं सरस्वतीनामदेवतां ध्यात्वा
मनसा सं[illegible]याशक्ति जपेत्॥ ततउपस्थानं कुर्यात्॥ तद्यथा॥ इ
मं मे वरुण तत्वा यामीत्यचोराजीगर्तिः शुनःशेप ऋषिः॥ वरुणो दे
वता॥ आद्या गायत्री॥ द्वितीया त्रिष्टुप् वरुणोपस्थाने॰॥ ॐ इमं मे व
रुण श्रुधी हवं॰ १ ॐ तत्वा यामि ब्रह्मणा वंदमानः॰ १ जातवेदस इ ॥राम॥
त्यादि पूर्ववदिति सायंसंध्या॥ ॥अथ सायमौपासनं॥ ॥आच ॥७३॥
मनादि॰ श्रीपर॰ र्थं सायमौपासनं करिष्ये इति संकल्प्य प्रातर्वद्धा
नादि कृत्वाग्नये स्वाहेति प्रथमाहुतिं द्वितीयां प्रजापतये स्वाहेत्यु
पस्थानमग्ने त्वं न इति चतसृभिः शेषं प्रातर्वदिति॥ ब्रह्मचारी त्व

ग्निकार्यं कुर्यात्॥ तच्चेत्थं॥ आचम्य तिथ्याद्यनुकीर्त्य ममो॰ र्थं प्रातरग्नि
कार्यं करिष्ये इति प्रातः। सायंतु सायमग्निकार्यं करिष्य इति संकल्प्यावा
हनादि पूजनांतं कृत्वा प्रादेशमात्रां समिधं गृहीत्वा। अग्नये समिध
माहार्षं बृहते जातवेदसे॥ तया त्वमग्ने वर्धस्व समिधा ब्रह्मणा वयं स्वा
हेति जुहुयात्॥ अग्नय इदं न ममेति त्यजेत्॥ ततआर्द्रपाणितलमग्नौ
प्रतिष्ठाप्य ॐ तेजसा मा समनज्मीति संहृतोष्ठ द्व्यमुखमवाद्भि॰ मज्य
पाणिं प्रक्षाल्य पुनर्द्विवारमेवं हुत्वा तिष्ठन्नग्निमुपतिष्ठेत्॥ तत्र मं
त्राः॥ मयि मेधां मयि प्रजां मय्यग्निस्तेजो दधातु। मायि मेधां॰ यीद्रइंद्रि
यं॰। मयि॰ मयि सूर्यो भ्राजो॰ ३ यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं॥
यत्ते अग्ने॰ वर्चस्तेनाहं॰। यत्ते॰ हरस्तेनाहं॰ ३ एभिरुपस्थाय विभूतिं
धृत्वा आंगिरस बार्हस्पत्य भारद्वाजेति त्रिप्रवरान्वित भारद्वाज

Indira Gandhi National
Centre for the Arts

गोत्रोत्पन्नोहं तोमदेवशर्माभोअग्नेत्वामभिवादयेएवंस्वस्वप्रवराद्यु
॥राम॥ च्चार्याभिवादयेदित्यग्निकार्यं॥अथदीपकालमाह मरीचिः॥रवेरस्तं
॥७४॥ समारभ्यैयावत्सूर्योदयोभवेत्॥यस्यतिष्ठेद्गृहेदीपस्तस्यनास्तिद
रिद्रता॥आयुर्दः प्राङ्मुखोदीपोधनदः स्यादुदङ्मुखः॥ प्रत्यङ्मुखो
दुःखदोसौहानिदोदक्षिणामुखइति॥ प्रत्यङ्मुखनिषेधस्तुकार्यका
रिनित्यदीपविषयएव।श्रीकार्तवीर्यादिदीपः प्रत्यङ्मुखएवस्था
प्यः॥ ततोदेवंसंपूज्यद्वितीयभोजनंकृत्वापुस्तकादिदर्शनेनरात्र्यायाः प्र
थमभागंनीत्वास्वपेत्॥ ॥अथस्वापविधिर्मात्स्ये॥शुचिदेशंविविक्तंतुगो ॥राम॥
मयेनोपलेपयेत्॥वैदिकैर्गारुडैर्मंत्रैरक्षितंमंत्र्यस्वपेत्ततः॥मंगल्यंपूर्णकुं ॥७४॥
भंचशिरस्थानेनिधापयेत्॥रात्रिसूक्तंजपन्रात्रौरात्रिक्षामोभवेन्नरः॥
स्कांदे॥उपानहौवेणवंदंडंमंबुपात्रंतथैवच॥तांबूलादीनिसर्वाणिसमी

पेस्थाप्येद्गृही॥नस्वपेदित्यनुवृत्तौमार्कंडेयः॥नार्द्रवासाश्चनग्नश्च
नोत्तरापरमस्तकः॥नाकाशेसर्वतःशून्येनचचैत्यद्रुमेतथेति॥स्वापका
लेविष्णुंनमस्कृत्यस्वापंकुर्वीत॥रात्रिसूक्तंजपन्स्मृत्वादेवांश्चसुखशायि
नः॥नमस्कृत्याव्ययंविष्णुंसमाधिस्थंस्वपेन्निशीतिस्मृतिचंद्रिकाकारधृ
तपुराणात्॥सुखशायिनोगस्त्यादीन्॥॥विष्णुपुराणे॥स्वगृहेचाशिरः
पूर्वेश्वशुरेदक्षिणाशिरःइति।स्मृत्यंतरे।।स्वगृहेप्राक्शिराःशेतेश्वशुरे
दक्षिणाशिराः॥प्रत्यक्शिराःप्रवासेचनकदाचिदुदक्शिराइति॥आश्व
लायनः॥पत्नीमृतुमतींस्निग्धांतल्पांभोगविवर्जितां॥उपेयान्मध्यरा
त्रेतेशीर्णेन्नेतत्समानसइति॥यमः॥पूर्वरात्रेव्यतीतेतुसंगच्छेदितिमंदि
र॥पादौप्रक्षाल्यपूर्वंपश्चाच्छय्यांसमाविशेत्॥धौतवस्त्रेचतांबूलंसंयो
गेवश्यभावहं॥शय्यावोकाशिल्पशास्त्रे॥चतुराशीतिपर्वाणिदैर्घ्यंणप

Indira Gandhi National
Centre for the Arts

रिकल्पयेत्॥षडंगुलानि विस्तारं मंचकं हस्तसंमितं॥एवं शय्याविधा
॥राम॥ तव्यासर्वेषां शयनोचिता॥मानाधिक्ये दरिद्रः स्यान्मानहीने सुखक्षय
॥७५॥ इति॥स्मृतिचंद्रिकायां विष्णुपुराणेपि॥ ॥नाविशालां नवाभग्नां नाश
नां मलिनां नच॥नचजंतुमयीं शय्यामधितिष्ठेदनास्तृतामिति॥पर्यं
कोप्युक्तस्तत्रैव॥आयामः सप्ततालः स्याच्चतुस्तालं चविस्तृतं॥द्विता
लमुन्नतं ज्ञेयमेतत्पर्यंकलक्षणं॥ तालादिप्रमाणं चोक्तं प्रयोगरत्नेऽस्म
त्यंतरे॥अंगुष्ठादिकनिष्ठांतं भवेन्मानचतुष्टयं॥प्रादेशस्तालगोकर्णं
गवितस्तिस्तु यथाक्रममिति॥मंडनः॥प्रादेशस्तालगोकर्णतर्जन्यादि ॥राम॥
युते तते॥अंगुष्ठे दशकाष्ठस्तु वितस्तिर्द्वादशांगुला॥ ॥अथस्त्रीकृत्य ॥७५॥
माह्यमः॥भर्तुः पादौ नमस्कृत्य पश्चाच्छय्यां समाविशेत्॥ ॥अथर
तिः॥संस्मृत्य परमात्मानं पत्न्या जंघे प्रसारयेत्॥योनिं स्पृष्ट्वा जपेत्सू

क्तं विष्णुर्योनिं प्रजापतेः॥रेतः सिंचेत्ततो योन्यां तस्माद्गर्भो बिभर्ति सेति
याज्ञवल्क्यः॥षोडशर्तुनिशाः स्त्रीणां तस्मिन्युग्मासु संविशेत्॥यथा
कामी भवेद्वापि स्त्रीणां वरमनुस्मरन्॥मनुः॥ तासामाद्याश्चतस्रस्तु
निंदितैकादशी तथा॥त्रयोदशी च शेषास्तु प्रशस्ता स्त्वत्र रात्रयः॥अ
मावास्याष्टमी चैव पूर्णमासी चतुर्दशी॥ब्रह्मचारी भवेन्नित्यमप्यतो
स्नातको द्विज इत्यादिनिषेधा मयूखादिषु द्रष्टव्याः॥स्मृत्यर्थसारे॥॥
ऋतौ तु मैथुने स्नायाद्गर्भसंभूतिशंकया॥अन्ततो तदभावाच्च शौचं
त्रिर्मृच्चवच्चरेत्॥तत्र ऋतुदर्शनमारभ्य षोडशदिवसेष्वाद्यदिनचतु
ष्टयमेकादशीं त्रयोदशीं च विहायावशिष्टेषु दिवसेषु पुत्रार्थी युग्मदि
ने कन्यार्थी युग्मदिने चतुर्थ्यर्थी षष्ठ्यष्टमी चतुर्दशी पंचदशी श्राद्धत
त्पूर्वव्रतोपवासश्राद्धनिमंत्रित तदुक्त शनिरविसौमभरणीकृत्तिका

Indira Gandhi National
Centre for the Arts

र्द्रामघापूर्वाफल्गुनीविशाखाज्येष्ठामूलपूर्वाषाढापूर्वाभाद्रपदात्रिज
न्मनक्षत्रसंक्रांतिव्यतीपातवैधतिव्यतिरिक्ते शय्यांतरे उपवीतीमन्मथ
गर्हं स्पृष्ट्वाविष्णुर्योनिमित्यादिजपित्वा ईश्वरं स्मृत्वोपेत्योत्थायस्नाया
त्॥ अन्ततोतुपूर्वोक्तं शौचं कुर्यात्॥ एवं यथायोगं भुक्तः सन् स्वशय्यायां
यथासुखं प्रबोधपर्यंतं स्वपित्वा पुनः प्रबोधे उत्थाय प्रातः स्मरणादीनि
कर्माणि प्रतिदिनं कुर्यात्॥ एतेषामकरणे प्रत्यवायः स्मृत्यर्थसारे॥ नास्ति
क्यात्कर्महानौ तु मासेन पतितः स्मृतः॥ द्वादशाब्दव्रते नैव तस्य शुद्धिस्तु
नान्यथा॥ तं निरीक्ष्यार्कमीक्षेत स्पृष्ट्वा स्नायात्सचैलकं॥ तेनैव सहयो ॥राम॥
हास्यं कुर्वन्नब्देन तत्समः॥ भुक्त्वा तदन्नं सद्यस्तु सर्पो गहने वने॥ आ ॥७६॥
श्वलायनः॥ बद्धत्वं वास्वगृह्योक्तं यस्य कर्म प्रकीर्तितं॥ तस्य तावति शास्त्रा
र्थः कृतः सर्वः कृतो भवेदिति॥ कूर्मपुराणे॥ इत्येतदखिलं प्रोक्तमहन्य

निर्णयसिंधावत्रिः॥ सप्तमासाधिके गर्भे वर्धमाने तु गर्भिणी॥ वर्जनीया
प्रयत्नेन दैवे पित्र्ये च कर्मणि॥१॥ सप्तमासाधिके गर्भे गर्भिण्याय समर्पि
तं॥ हव्यं देवा न गृह्णंति कव्यं च पितरस्तथा॥२॥ सप्तमासाधिके गर्भे गर्भिण्या
यदि पच्यते॥ अन्यगोत्रैर्न भोक्तव्यं मा पद्यपि न कर्हिचित्॥३॥ सप्तमासा
धिके गर्भे गर्भिण्या यदि पच्यते॥ तद्गृहं भिक्षुणा त्याज्यं नियमेनात्मवा
न्मुनिरिति॥४॥ ॥अथ गर्भिणीहस्तभोजननिषेधः॥ षष्ठेमासि तु संप्रा
प्ते गर्भिण्याश्चैव हस्ततः॥ न भोक्तव्यं विशेषेण इति शातातपोऽब्रवीत्॥
॥५॥ नारदसंहितायां॥ द्विजस्य धर्मपत्नी तु अंतर्वत्नी यदा भवेत्॥ पंचमे
निर्गते मासे तस्या हस्ते न भोजनं॥ न कुर्यादिति शेषः॥६॥ ॥शिवसंहिता
यां शिवः॥ गर्भिणी तु यदा भार्या विप्रादीनां विशेषतः॥ तासां हस्तेन भो
क्तव्यं भुक्त्वा चांद्रायणं चरेत्॥७॥ मासे षष्ठे सप्तमे वाष्टमे वा प्राप्ते पत्न्या
नैव कुर्यात्कदाचित्॥ होमं यानं देवयात्रां तथैव तस्या हस्ते नाशनं विप्र

Indira Gandhi National
Centre for the Arts

आचारार्क॰

हनिवैमया॥ब्राह्मणानांकृत्यजातमपवर्गफलप्रदं॥नास्तिक्यादथवालस्याद्ब्रा
॥राम॥ ह्मणोनकरोतियः॥सयातिनरकान्घोरान्काकयोनौप्रजायते॥नान्योविमु
॥७७॥ क्तयेपंथामुक्त्वाश्रमविधिंस्वकं॥तस्मात्कर्माणिकुर्वीततुष्टयेपरमेष्ठिनइ
ति॥गोभिलः॥योविप्रःकृतनित्यस्तुससर्वान्कृतवान्मखान्॥सस्नातःस
र्वतीर्थेषुतप्तंतेनाखिलंतपइतिदिक्॥ ॥इतिश्रीभरद्वाजमहादेवभट्टात्म
जदिवाकरकृतेआचारार्केप्रथमभागकृत्यं॥ ॥समाप्तिमफाणीदसा
वाचारार्कः॥ ॥यत्पादपंकजपरागपवित्रदेहाहित्वाकलेवरमिदंकिलपा
षदंसा॥जग्राहगौतमवधूःकमनीयरूपंतंजानकीपतिमजंमनसास्मरामि॥१॥ ॥राम॥
यद्वाक्याद्धिविवाक्यार्थमपूर्वार्थाभिधारता॥नीलकंठेजयत्येषमीमांसकधुरंध ॥७७॥
रः॥२॥श्रीबालकृष्णात्मजसन्नुनिर्मितंवर्षेत्रिवेदाश्वहिमांशुसंयुते॥जनाःप्र
कुर्युःकिलधर्मकार्यमाचारसूर्यंपरिसंविलोक्य॥१॥ ॥प्रभवेचाश्विनेशु
क्लपौर्णमास्यांकुजेदिवा॥रामेश्वरेणलिखितमाचारार्कस्यपुस्तकं॥ ॥छ॥ ॥
॥ ॥छ॥श्रीकृष्णार्पणमस्तु॥ ॥छ॥=खि=॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

वर्याः॥८॥ ॥इतिगर्भिणीभोजननिषेधवाक्यानि॥ ॥छ॥ ॥छ॥ ॥
पित्रोःप्रत्याब्दिकेप्राप्तेतर्पणंतुकथंभवेत्॥जलेनैवप्रकर्तव्यंनिवृत्ते
७८ पितृकर्मणि॥१॥श्राद्धंकृत्वातुविधिवद्वैश्वदेवादिकंततः॥ब्रह्मयज्ञं
ततःकुर्यात्तर्पणंतुतिलैर्विना॥२॥स्मृत्यंतरं॥ ॥छ॥ ॥छ॥ ॥छ॥

॥ इत्याचारार्कः समाप्तः॥

उ

राम
॥७५॥

Indira Gandhi National
Centre for the Arts